व मुदितोऽर्जुनः १९ हुताशनं पुरस्कृत्य ततस्तदपि वीर्यवान् जग्राह बलमास्थाय ज्यया च युयुजे धनुः २० मौर्व्यां तु योज्यमाना
यां बलिना पांडवेन ह येऽशृण्वन्कूजितं तत्र तेषां वै व्यथितं मनः २१ लब्ध्वा रथं धनुश्चैव तथाक्षय्यमहेषुधी बभूव कल्यः कौंते
यः प्रहृष्टः सख्यकर्मणि २२

केतनं लांछने काये इति विश्वः १५ १६ नादेन येषां १७ १८ ज्यया मौर्व्या २० २१ कल्यः समर्थः सख्यकर्मणि सहायके २१ २२ २२ २२

वज्रं वरत्रासानमोयस्तत स्त्वद्दुश्कुनिवत्पुनः प्रयोक्तुं हस्तमापाती तस्यथः वज्रं न युवरत्रयोरिति मिदिनी अनर एवाग्नेयं अस्त्रमिवास्त्रं २३ २४ २५ नदेवाहास्येत्संक्षिप्त

वज्रनाभं ततश्चक्रं ददौ कृष्णाय पावकः आग्नेयमस्त्रं दयितं स च कल्प्योऽभवत्तदा २३ अब्रवीत्पावकश्चैवमेतेन मधुसूदन अमानुषा
नपि रणे जेष्यसि त्वमसंशयं २४ अनेन तु मनुष्याणां देवानामपि चाहवे रक्षःपिशाचदैत्यानां नागानां चाधिकस्तथा २५ भ
विष्यसि न संदेहः प्रवरोऽपि निबर्हणे क्षिप्तं क्षिप्तं रणे चैतत्त्वया माधव शत्रुषु हत्वाप्रतिहतं संख्ये पाणिमेष्यति ते पुनः २६ व
रुणश्च ददौ तस्मै गदामशनिनिस्वनां दैत्यान्तकरणीं घोरां नाम्ना कौमोदकीं प्रभुः २७ ततः पावकमब्रूतां प्रहृष्टौ कृष्णार्जुनावच्यु
तौ कृतास्त्रौ शस्त्रसंपन्नौ रथिनौ ध्वजिनावपि २८ कल्प्यौ स्वो भगवन्योद्धुमपि सर्वैः सुरासुरैः किं पुनर्वज्रिणैकेन पन्नगा
र्थे युयुत्सता २९ अर्जुन उवाच चक्रपाणिर्हृषीकेशो विचरन्युधि वीर्यवान् चक्रेण भस्मसात्सर्वं विसृजेन्नु वीर्यवान्
३० त्रिषु लोकेषु तं नास्ति यन्न कुर्याज्जनार्दनः गाण्डीवं धनुरादाय तथाक्षय्ये महेषुधी अहमप्युत्सहे लोकान्विजेतुं युधि पा
वक ३१ सर्वतः परिवार्यैव दावमेतं महाप्रभो कामं संप्रज्वलाद्यैव कल्प्यौ स्वः साहाय्यकर्मणि ३२ एवमुक्तः स भगवान्
दाशार्हेणार्जुनेन च तैजसं रूपमास्थाय दावं दग्धुं प्रचक्रमे ३३ ॥ ॐ २

मिति १६ १७ १८ युयुत्सुना योद्धुमिच्छता २६ २७ २८ २९ ३० ३१ ३२ ३३

सप्तार्चिः कालीकरालीप्रभृतिसप्तजिह्वावान् ३४ ३५ द्रवतः द्रवमानस्य ३६ अक्षयः तोरथ्याभ्यामिति आश्रितौ तं रथश्रेष्ठमिति द्वयोरेकरथस्थत्वं प्राग्युक्तं तच्छोभामात्रमा

सर्वतः परिवार्याथ सप्तार्चिर्ज्वलनस्तथा ददाह खाण्डवं दावं युगान्तमिव दर्शयन् ३४ प्रतिगृह्य समाविश्य तद्वनं भरतर्षभ मेघस्तनि
तनिर्घोषः सर्वभूतान्यकंपयत् ३५ दहतस्तस्य च बभौ रूपं दावस्य भारत मेरोरिव नगेन्द्रस्य कीर्णस्यांशुमतोंऽशुभिः ३६ इत्यादिपर्वणि
खांडव वैशं तौ रथाभ्यां रथश्रेष्ठौ दावस्योभयतः स्थितौ दिक्षु सर्वासु भूतानां चक्राते कदनं महत् १ यत्र यत्र च दृश्यन्ते प्राणिनः खां
डवालयाः पलायन्तः प्रवीरौ तौ तत्र तत्राभ्यधावताम् २ छिद्रं न सम्प्रपश्यन्ति रथयोराशुचारिणोः आविद्धाविव दृश्येते रथिनौ तौ र
थोत्तमौ ३ खांडवे दह्यमाने तु भूतानि शतसंघशः उत्पेतुर्भैरवान्नादान् विनदन्तः समन्ततः ४ दग्धैकदेशा बहवो निष्टप्ताश्च तथा
परे स्फुटिताक्षा विशीर्णाश्च विप्लुताश्च तथापरे ५ समालिङ्ग्य सुतानन्ये पितॄन्भ्रातॄनथापरे त्यक्तुं न शेकुः स्नेहेन तत्रैव निध
नं गताः ७ संदष्टदशनाश्चान्ये समुत्पेतुरनेकशः ततस्तेऽतीव घूर्णन्तः पुनरग्नौ प्रपेदिरे द ग्धपक्षाक्षिचरणा विचेष्टन्तो महीत
ले तत्र तत्र स्म दृश्यन्ते विनश्यन्तः शरीरिणः ८ जलाशयेषु तप्तेषु क्वाथ्यमानेषु वह्निना गतसत्त्वाः स्म दृश्यन्ते कूर्ममत्स्याः समन्त
ताः ९ ॥ ॥

सुपायोगसूचनार्थां इहतुष्टय ग्रथस्थोवेवेर्तिज्ञेयं १ २ आविद्धावेव अलातचक्रवद्भ्रामितावेव ३ ४ निष्टप्ताश्च नितप्ताः विशीर्णाः कर्कटीफलवद्विदीर्णाः विप्लु
ताः मग्याहिद्रुताः ७ ८ ९ ९

शरीरैर्लोहप्रतिमावदस्यंततः १० वसुरेतसिवह्नौ ११ १२ मथ्यतः मथ्यमानस्य १३ १४ १५ १८ अक्षः रथस्यचक्रद्वयसंधानकाष्ठंतत्प्रमाणा अक्षमात्राः १९ २०

आ० ३६८

८३

शरीरैरपरेदीप्तैर्देहवंतइवाग्नयः अदृश्यंतवनेतत्रप्राणिनः प्राणसंक्षये १० कांश्चिदुत्पततः पार्थः शरैः संछिद्यखंडशः पातयामासविहगा
न्प्रदीप्तेवसुरेतसि ११ तेशराचितसर्वांगानिनदंतोमहारवान् ऊर्ध्वमुत्पत्यवेगेननिपेतुःखांडवेपुनः १२ शरैरभ्याहतानांचसंघशः स्मव
नौकसांविरावः शुश्रुवेघोरः समुद्रस्येवमथ्यतः १३ वह्नेश्चापिप्रदीप्तस्यखमुत्पेतुर्महार्चिषः जनयामासुरुद्वेगंसुमहांतंदिवौकसां १४ तेना
र्चिषासुसंतप्तादेवाः सर्षिपुरोगमाः ततोजग्मुर्महात्मानसर्वएवदिवौकसः १५ शतक्रतुंसहस्राक्षंदेवेशमसुरार्दनं देवाऊचुः किंन्वि
मेमानवाः सर्वेदह्यंतेचित्रभानुना कच्चिन्नसंक्षयः प्राप्तोलोकानाममरेश्वर १६ वैशंपायनउवाच तच्छ्रुत्वावृत्रहातेभ्यः स्वयमेवान्ववे
क्ष्यच खांडवस्यविमोक्षार्थंप्रययौहरवाहनः १७ महतारथवृंदेननानारूपेणवासवः आकाशंसमवाकीर्यप्रववर्षसुरेश्वरः १८ ततोक्ष
मात्राअसृजन्धाराः शतसहस्रशः चोदितादेवराजेनजलदाःखांडवंप्रति १९ असंप्राप्तास्तताधारास्तेजसाजातवेदसः खएव
समशुष्यंतनकाश्चित्पावकंगताः २०

राम० ३६९

श्रीकृष्णजयकृष्णजयजयकृष्ण ॥ ॥ ॥ ॥ ॥ ॥ ॥

२१ २२ अध्यायः तस्याथ १ ४ ६ निगीर्यतेयावत्ताकालेवत्ताबत्तेवनिगीर्यमाणाऽर्जुनेनहन्यमानासतीआक्रामत्क्रांतवतीखमितिशेषः मुमुक्षयामोचनेछया ७ ८ ९

ततोनमुचिहाक्रुद्धोभृशमर्चिष्मतस्तदा पुनरेवमहामेघैरंभांसिव्यसृजद्बहु २१ अर्चिर्धाराभिसंबद्धंधूमविद्युत्समाकुलं वभूवतद्वनंघोरंस्त
नयित्नुसमाकुलं २२ आदिपर्वणिखांडवदाहे वैशं तस्याथवर्षतोवारिपांडवः प्रत्यवारयत् शरवर्षेणबीभत्सुरुत्तमास्त्राणिदर्शयन् १
खांडवंचवनंसर्वंपांडवोबहुभिः शरैः प्राच्छादयदमेयात्मानीहारेणेवचंद्रमाः २ नचस्मकिंचिच्छक्नोतिभूतंनिश्चरितुंततः संछाद्यमा
नेखवाणैरस्यतासव्यसाचिना ३ तक्षकस्तुनतत्रासीन्नागराजोमहाबलः दह्यमानेवनेतस्मिन्कुरुक्षेत्रंगतोह्यसौ ४ अश्वसे
नोभवत्तत्रतक्षकस्यसुतोबली सयत्नमकरोत्तीव्रंमोक्षार्थंजातवेदसः ५ नशशाकसनिर्गंतुंनिरुद्धोर्जुनपत्रिभिः मोक्षयामासतं
मातानिगीर्यभुजगात्मजा ६ तस्यपूर्वंशिरोग्रस्तंपुच्छमस्यानिगीर्यते निगीर्यमाणासाक्रामत्सुतंनागीमुमुक्षया ७ तस्याः
शरेणतीक्ष्णेनपृथुधारेणपांडवः शिरश्चिच्छेदगच्छंत्यास्तामपश्यच्छचीपतिः ८ तंमुमोचयिषुर्वज्रीवातवर्षेणपांडवं मोहया
मासतत्कालमश्वसेनस्त्वमुच्यत ९ तांचमायांतदादृष्ट्वाघोरांनागेनवंचितः द्विधात्रिधाचखगतान्प्राणिनःपांडवोच्छिनत् १०

॥ ॥ ॥ ॥ ॥ ॥

अप्रतिष्ठो निराश्रयः असंततिर्वा ११ १७ निष्प्रतीकारं बलवदाश्रयात् भाविग्लानिहीनं तदृष्टं तस्योपायस्य सः १८ २० २१ २२

शशापैनं च संक्रुद्धो देवीमत्सुजिलस्य गामिनं पावको वासुदेवस्याप्यप्रतिष्ठो भविष्यसि ११ ततो जिष्णुः सहस्राक्षं खं विविंत साश्रुगैः शरैः
योधयामास संक्रुद्धो वचनं तामनुस्मरन् १२ देवराजोपि तं दृष्ट्वा संरब्धं समरेर्ज्जुनं स्वमस्त्रमसृजत्तीव्रं छादयित्वाखिलं नभः १३ त
तो वायुर्महाघोषः क्षोभयन् सर्वसागरान् वियत्स्थो जनयन्मेघान् जलधारासमाकुलान् १४ ततो शनिमुचो घोरांस्तडित्स्तनित
निस्वनान् तद्विघातार्थमसृजदर्ज्जुनोप्यस्त्रमुत्तमम् १५ वायव्यमभिमंत्र्याथ प्रतिपत्तिविशारदः तेनेन्द्राशनिमेघानां वीर्यौजस्तद्वि
नाशितं १६ जलधाराश्च ताः शोषं जग्मुर्नेशुश्च विद्युतः क्षणेन चाभवद्व्योम संप्रशान्तरजस्तमः १७ सुखशीतानिलवहं प्रकृ
तिस्थार्कमंडलं निष्प्रतीकारहृष्टश्च हुतभुग्विविधाकृतिः १८ सिच्यमानो वसौघैस्तैः प्राणिनां देहनिःसृतैः प्रजज्वालाथ सो
ऽर्च्चिष्मान्स्वनादैः पूरयंजगत् १९ कृष्णाभ्यां रक्षितं दृष्ट्वा तं च दावमहंकृताः खमुत्पेतुर्महाराज सुपर्णाद्याः पतत्त्रिणः २० गरुत्मा
न्वज्रसदृशैः पक्षतुंडनखैस्तथा प्रहर्तुकामो न्यपतद्राकाशात् कृष्णपांडवौ २१ तथैवोरगसंघाताः पांडवस्य समीपतः उत्सृज
न्तो विषं घोरं निष्पेतुर्ज्वलिताननाः २२

२३ २४ अयः कणपः कणानलोहगुलिकाः पिबन्तीति तथाविधं आग्नेयौषधबलेन गर्भे संभृताः लोहगुलिकाः तारका इव विकीर्यन्ते येन तत् घं अयः कणपं लोहमयं तथा चक्रा
श्मसंज्ञयस्य अग्निबलेन महान्तोपि पाषाणाः अतिदूरे क्षिप्यन्ते तत् काष्ठमयं यंत्रं भुशुण्डी चर्मरज्जुमयं यंत्रं पाषाणक्षेपणमेव तैः उद्यताः बाहवो येषां ते असुरा इत्यर्थः अयः कणपच

तांश्चकर्त शरैः पार्थः सरोषाग्निसमुत्क्षितैः विविशुश्चापि तं तीव्रं देहाभावाय पावकं २३ ततोऽसुराः सगन्धर्वा यक्षराक्षसपन्नगाः उ
त्पेतुर्नादमतुलमसृजंतो रणार्थिनः २४ अयः कणपचक्राश्मभुशुंड्युद्यतबाहवः कृष्णपार्थौ जिघांसन्तः क्रोधसंमूर्छितौजसः
२५ तेषामतिव्याहरतां शस्त्रवर्षं च मुंचतां प्रममाथोत्तमांगानि बीभ त्सुर्निशितैः शरैः २६ कृष्णश्च सुमहातेजाश्चक्रेणारि
विनाशनः दैत्यदानवसंघानां चकार कदनं महत् २७ अथापरे शरैर्विद्धाश्चक्रवेगेरितास्तथा वेलामिव समासाद्य व्यतिष्ठन्न
मितौजसः २८ ततः शक्रोतिसं क्रुद्धस्त्रिदशानां महेश्वरः पांडुरं गजमास्थाय तावुभौ समुपाद्रवत् २८ ॥ ॥

क्राश्मभुशुंड्युद्यतबाहवः क्रोधसंमूर्छितौजसः क्रोधेन संवर्धिततेजसः २५ अतिव्याहरतां कथ्यमानानां २६ २७ यथा चक्रवेगेन जलावर्त्तप्रवाहेण ईरितास्तरणार्थं यानं
स्तां प्राप्य विष्टितं तस्तब्धं प्राप्य निवर्त्तन्ते एवं चक्रवेगेन अस्खलत्तया वेन ईरिता असुरौघाः कृष्णार्जुनौ प्राप्य व्यतिष्ठन्निति अर्थः चक्रालोकि इत्युपक्रम्य कुंभे कारोपकरणास्त्रयो
:जलावर्त्ते पीति मेदिनी २८ २९

३० ३१ गदां चैवेत्यत्र शिबिकामिति पाठे शिबिका गदेति [illegible] प्राचः शिबिकेति सा तु लारपादेत्युक्तमदृश्यामीषद्वक्रं आयुधं इति सुतलं तन्त्र इति विदे वेत्तेषु प्रसिद्धं दारुमयं लोहमयमपि वलवत्सु

वेगेनाशनिमादाय वज्रमस्त्रं स सोऽसृजत् हतो वेत्ताविति प्राह सुरान्मधुसूदनः ३० ततः समुद्यतां दृष्ट्वा देवेंद्रेण महाशनिं जगृहुः सर्वशस्त्राणि शस्त्राणि सुरास्तथा ३१ कालदंडं यमो राजन् गदां चैव धनेश्वरः पाशं च भगवान् वरुणो विचित्रां च तथाशनिं ३२ स्कंदः शक्तिं समादाय तस्थौ मेरुरिवाचलः ओषधीर्दीप्यमानाश्च जगृहाते ह्यश्विनावपि ३३ जगृहे च धनुर्धाता मुशलं तु जयस्तथा पर्वतं चापि जग्राह क्रुद्धस्त्वष्टा महाबलः ३४ अंशस्तु शक्तिं जग्राह मृत्युर्देवः परश्वधं प्रगृह्य परिघं घोरं विचचारार्यमापि ३५ मित्रश्च क्षुरपर्यंतं चक्रमादाय तस्थिवान् पूषा भगश्च संक्रुद्धः सविता च विशांपते ३६ आत्तकार्मुकनिस्त्रिंशाः कृष्णपार्थौ प्रदुद्रुवुः रुद्राश्च वसवश्चैव मरुतश्च महाबलाः ३७ विश्वेदेवास्तथा साध्या दीप्यमानाः सुतेजसा एते चान्ये च वहवो देवास्तौ पुरुषोत्तमौ कृष्णपार्थौ जिघांसंतः प्रतीयुर्विविधायुधाः ३८ तत्राद्भुतामदृश्यंत निमित्तानि महाहवे युगांतसमरूपाणि भूतसंमोहनानि च ३९

संभाव्यत एव ३२ ३३ पर्वतं चापीत्यत्र विच कंपरीति पाठे प्रियचक्रं त्रिशूलं ३४ अर्यमाश्चापीत्यत्र संधिरविवक्षितः ३५ ३६ ३७ निमित्तानि सूचकानि उल्कापातादीनि ३८

४० ४१ ४४ ४७ ४९ गिरेः गिरिशृंगस्य ५० शैलेनविलासमहेहनकारणेनशृंगेणाकर्त्रोऽध्यायः ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तथादृष्ट्वासुसंरब्धंशक्रंदेवैः सहाच्युतौ अभीतौ युधिदुर्धर्षौतस्थतुः सज्यकार्मुकौ ४ आगच्छतस्ततोदेवानुभौयुद्धविशारदौ व्यताड
येतांसंक्रुद्धौशरैर्वज्रोपमैस्तदा ४१ असकृद्भग्नसंकल्पाः सुराश्चबहुशः कृताः भयाद्रणंपरित्यज्यशक्रमेवाभिशिश्रियुः ४२ दृष्ट्वा
निवारितान्देवान्माधवेनार्जुनेनच आश्चर्यमगमंस्तत्रमुनयोनभसिस्थिताः ४३ शक्रश्चापितयोर्वीर्यमुपलभ्यासकृद्रणे बभूवप
रमप्रीतोभूयश्चैतावयोधयत् ४४ ततोश्मवर्षंसुमहद्व्यसृजत्पाकशासनः भूयएवतदावीर्यंजिज्ञासुः सव्यसाचिनः ४५ तच्छरै
रर्जुनोवर्षंप्रतिजघ्नेऽमर्षितः विफलंक्रियमाणंतत्समवेक्ष्यशतक्रतुः ४६ भूयः संवर्धयामासतद्वर्षंपाकशासनः ४६ सो
श्मवर्षंमहावेगैरिषुभिः पाकशासनिः विलयंगमयामासहर्षयन्पितरंतथा ४७ ततउत्पाट्यपाणिभ्यांमन्दराच्छिखरंमहत् सद्रुमंव्य
सृजच्छक्रोजिघांसुः पाण्डुनन्दनं ४८ ततोर्जुनोवेगवद्भिर्ज्वलिताग्रैरजिह्मगैः शरैर्विध्वंसयामासगिरेः शृंगंसहस्रधा ४९ गि
रेर्विशीर्यमाणस्यतस्यरूपंतदाबभौ सार्कचन्द्रग्रहस्येवनभसः परिशीर्यतः ५० तेनाभिपतितादावंशैलेनमहताभृशं शृंगेणतानि
हतानितत्रप्राणिनःखाण्डवालयाः ५१ आदिपर्वणिखाण्डवदाहे ॥ ॥ ॥ ॥ ॥

श्री०
३७१

तथा तरक्षवः खल्पव्याघ्राः काम्राः भल्लाः १ प्रभिन्नाः मदच्युताः केसरिणः उत्पन्नकेसराः युवानइत्यर्थः २ द्रावयंतउत्पातनादाः निर्घातादयः तच्छद्वेनसंत्रासितेवनेइतिशेषः

वैशंपायनउवाच तथाशैलनिपातेनभीषिताः खांडवालयाः दानवाराक्षसानागास्तरक्ष्वृक्षवनौकसः १ द्विपाः प्रभिन्नाः शार्दूलाः
सिंहाः केस[illegible]रिणास्तथा समुद्विग्नाविसस्रुपुस्तथान्याभूतजातयः २ तदावनसमुद्दैक्षंतकृष्णौचाभ्युद्यतायुधौ
उत्पातनादशब्देनसंत्रासिताइवास्थिताः ३ तेवनंप्रसमीक्ष्याथदह्यमानमनेकधा कृष्णमभ्युद्यतास्त्रंचनादंमुमुचुरुल्बणं ४ तेननादे
नरौद्रेणनादेनचविभावसोः रराससगगनंकृत्स्नमुत्पातजलदैरिव ५ ततः कृष्णोमहाबाहुः स्वतेजोभास्वरंमहत् चक्रंव्यसृजदत्युग्रंतेषां
नाशायकेशवः ६ तेनार्त्ताजातयः क्षुद्राः सदानवनिशाचराः निकृत्ताः शतशः सर्वेनिपेतुरनलेक्षणात् ७ तत्रादृश्यंततेदैत्याः
कृष्णचक्रविदारिताः वसारुधिरसंपृक्ताः [illegible] संध्यायामिवतोयदाः ८ पिशाचान्पक्षिणोनागान्पशूंश्चैवसहस्रशः निघ्नंश्चरतिवा
र्ष्णेयः कालवत्तत्रभारत ९ क्षिप्तंक्षिप्तंपुनश्चक्रंकृष्णस्यामित्रघातिनः छित्वानेकानिसत्वानिपाणिमेतिपुनः पुनः १० तथातुनि
घ्नतस्तस्यपिशाचोरगराक्षसान् बभूवरूपमत्युग्रंसर्वभूतात्मनस्तदा ११ समेतानांतुसर्वेषांदानवानांचसर्वशः विजेताना
र्ष्णे
भवत्कश्चित्तत्कृष्णपांडवयोर्मृधे १२

संचारितेइतिपाठेपिसएवार्थः ३ ४ रराससशब्दंकृतवान् ५ ६ ७ ८ ९ १० ११ १२ १२

१३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ ॥ ॥

तेपार्थवलात्सरित्त्रातुंतंचराचंपरात्तुराः नाशक्नुवन्शमयितुंतत्राग्निंवम्पराङ्मुखाः १३ शतक्रतुस्ततःसंप्रेक्ष्यविमुखानमरांस्तथा बभूव
मुदितोराजन्प्रशंसन्केशवार्जुनौ १४ निवृत्ते[illegible]ष्वथदेवेषुवाग्उवाचाशरीरिणी शतक्रतुंसमाभाष्यमहागंभीरनिस्वना १५ नैतस
ख्वासंनिहितस्तस्यतक्षकोभुजगोत्तमः दाहकालेखांडवस्यकुरुक्षेत्रंगतोह्यसौ १६ नचशक्यौयुधाजेतुंकथंचिदपिवासव वासुदेवा
र्जुनावेतौनिबोधवचनान्मम १७ नरनारायणावेतौपूर्वदेवौदिविश्रुतौ भवानप्यभिजानातियद्वीर्यौयत्पराक्रमौ १८
नैतौशक्यौदुराधर्षौविजेतुमजितौयुधि अपिसर्वेषुलोकेषुपुराणावृषिसत्तमौ १९ पूजनीयतमावेतावपिसर्वैः सुरासुरैः
यक्षराक्षसगंधर्वनरकिन्नरपन्नगैः २० तस्मादितः सुरैः सार्द्धंगंतुमर्हसिवासव दिष्टंचाप्यनुपश्यैतत्खांडवस्यविनाशनं
२१ इतिवाक्यमुपश्रुत्यतथ्यमित्यमरेश्वरः क्रोधामर्षौसमुत्सृज्यसंप्रतस्थेदिवंतदा २२ तंप्रस्थितंमहात्मानंसमवेक्ष्यदि
वौकसः सहिताः सेनयाराजन्ननुजग्मुः पुरंदरं २३ देवराजंतदायांतंसहदेवैरवेक्ष्यतु वासुदेवार्जुनौवीरौसिंहनादंविनेदतुः
२४ देवराजेगतेराजन्प्रहृष्टौकेशवार्जुनौ निर्विशंकंवनंवीरौदाहयामासतुस्तदा २५ ॥ ॥ ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२६ २९ ३१ गंधोदधिचारा तिस्त्रनिहरस्थोपलक्षणं ३२ ३ एकायनगता: संधीभूता: ३४ ७ हतादत्तो सुधांसभोजनं ३८

स्या०
३७२

समाकृत्त इवाम्भाणिनाशयित्वार्जुनः सुरान् अधमध्यरसंघातैर्दिनः स्वाउवालयान् ३६ नचस्मकिंचिच्छक्नोति भूतं तिष्ठरितुं ततः
संछिद्यमानमिषुभिरसत्तासव्यसाचिना २७ नाशक्नुवंश्च भूतानि महास्त्रपरिरणेर्जुने निरीक्षितुममोघास्त्रं योद्धुं चापि कुतो रणे
२८ शतैवकेन विद्याधरशतैनैक पतत्त्रिणां असवन्ते: पतन्त्यो साक्षात्कालहताइव २९ नचालं भन्ततेशर्मरोधः सुविष्णुच ष्मे ३
पितरैरेवनिवासेषु संतापश्चाप्यजायत ३० भूतसंघाश्च बहवो दीनाश्चक्रुर्महास्वनं रुरुदुर्वारणाश्चैव तथा मृगतरक्षवः ३१
तेन शब्देन वित्रेसुर्गगोदधिचरा मृषाः विद्याधरगणाश्चैव ये च तत्रवनौकसः नैव त्वर्जुनमहाबाहो नापि कश्चिज्जनार्दनं निरीक्षि
तुंवै शक्नोति कश्चिद्योद्धुं कुतः पुनः ३३ एकायनगतो पापिनिष्पेतुस्तत्र केचन राक्षसा दानवा नागाजघ्ने चक्रेणतान् हरिः
३४ तेतु भिन्नशिरोदेहाश्चक्र वेगाद्गतासवः पेतुरन्ये महाकायाः प्रदीप्ते वसुरेतसि ३५ समांसरुधिरौघैश्च वसाभिश्चापि
तर्पितः उपर्याकाशगो भूत्वाविधूमः समपद्यत ३६ दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः दीप्तोर्ध्वकेशः पिंगाक्षः पिबन्प्रा
णभृतां वसा ३७ तां सकृष्णार्जुनकृतां सुधां प्राप्य हुताशनः बभूव मुदितस्तृप्तः परां निर्वृतिमागतः ३८ ३९ ॥

एम०
३७२

३९ ४० ४१ ४२ ४३ ४४ ४५ शार्ङ्गकानपक्षिविशेषान ४६ अध्यायः किमर्थं १ २ ३ ॥

तथासुरंमयंनामतक्षकस्यनिवेशनात विप्रद्रवंतंसहसाददर्शमधुसूदनः ३९ तमग्निःप्रार्थयामासदिधक्षुर्वातसारथिः
शरीरवान्जटीभूत्वानदन्निवबलाहकः ४० जिघांसुर्वासुदेवस्तेचक्रमुद्यम्यधिष्ठितः सचक्रमुद्यतंदृष्ट्वादिधक्षंतंचपा
वकं ४१ अभिधावार्जुनेत्येवंमयस्त्राहीतिचाब्रवीत तस्यभीतस्वनंश्रुत्वामाभैरितिधनंजयः ४२ प्रत्युवाचमयंपार्थोजी
वयन्निवभारत तंनभेतव्यमित्याहमयंपार्थोदयापरः ४३ तंपार्थेनाभयेदत्तेनमुचेर्भ्रातरंमयं नहंतुमैच्छद्दाशार्हःपावकोन
ददाहच ४४ वैशंपायनउवाच तद्वनंपावकोधीमानदिनानिदशपंचच ददाहकृष्णपार्थाभ्यांरक्षितःपाकशासनात ४५
४५ तस्मिन्वनेदह्यमानेषडग्निर्नददाहच अश्वसेनंमयंचैवचतुरःशार्ङ्गकांस्तथा ४६ आदिपर्वणिखांडवदाहे जन
मेजयउवाच किमर्थंशार्ङ्गकानग्निर्नददाहतथागते तस्मिन्वनेदह्यमानेब्रह्मन्नेतत्प्रचक्ष्वमे १ अदाहेह्यश्वसेनस्य
दानवस्यमयस्यच कारणंकीर्तितंब्रह्मन्नशार्ङ्गकाणांनकीर्तितं २ तदेतदद्भुतंब्रह्मन्शार्ङ्गकाणामनामयं कीर्तयस्वा
ग्निसंमर्देकथंतेनविनाशिताः ३

आ
३७३

४ ८ आवृताःप्रतिषिद्धभोगाः ९ १२ प्रजायस्वप्रजेच्छांकुरु १३ अपत्यसंतानेसंततेरविछेदे १४ १५ ॥

वैशं यदर्थंशार्ङ्गकानग्निर्नददाहतथागते ततेसर्वंप्रवक्ष्यामियथाभूतमरिंदम ३ धर्मज्ञानांमुख्यतमस्तपस्वी
संशितव्रतः आसीन्महर्षिःश्रुतवान्मंदपालइतिश्रुतः ५ समार्गमास्थितोराजन्नृषीणामूर्ध्वरेतसां स्वाध्यायवान्
धर्मरतस्तपसाविजितेंद्रियः ६ सगत्वातपसःपारंदेहमुत्सृज्यभारत जगामपितृलोकायनलेभेतत्रतत्फलं ७ सलो
कानफलान्दृष्ट्वातपसानिर्जितानपि पप्रच्छधर्मराजस्यसमीपस्थान्दिवौकसः ८ मंदपालउवाच किमर्थमावृ
तालोकाममैतेतपसार्जिताः किंमयानकृतंतत्रयस्यैतत्कर्मणःफलं ९ तत्राहंतत्करिष्यामियदर्थमिदमावृतं फ
लमेतस्यतपसःकथयध्वंदिवौकसः १० देवाऊचुः ऋणिनोमानवाब्रह्मन्जायंतेयेनतच्छृणु क्रियाभिर्ब्रह्मचर्ये
णप्रजयाचनसंशयः ११ तदपाक्रियतेसर्वंयज्ञेनतपसासुतैः तपस्वीयज्ञकृच्चासिनचतेविद्यतेप्रजा १२ तइमे
प्रसवस्यार्थेतवलोकाःसमावृताः प्रजायस्वततोलोकानुपभोक्ष्यसिपुष्कलान् १३ पुन्नाम्नोनरकात्पुत्रस्त्रायते
पितरंश्रुतिः तस्मादपत्यसंतानेयतस्वब्रह्मसत्तम १४ वैशंपायनउवाच तच्छ्रुत्वामंदपालस्तुवचस्तेषांदिवौक राम०
सां क्वनुशीघ्रमपत्यंस्याद्बहुलंचेतिचिंतयन् १५ ॥ ३७३

जरितांनामभार्यां १६ लपितांनामापरांभार्यां १७ तान्बालानपास्येतिसंबंधः १८ २२ मुखमितिजीवरूपेणभोक्तृत्वं गूढइतिब्रह्मरूपेणागोचरत्वं २३ त्रिविधंदिव्यंभौमंजठ

सचिंतयन्नभ्यगच्छत्सुब[illegible]हुप्रसवान्खगान् शार्ङ्गिकांशार्ङ्गिकोभूत्वाजरितांसमुपेयिवान् १६ तस्यांपुत्रानजनयच्चतुरो
ब्रह्मवादिनः तानपास्यसतत्रैवजगामलपितांप्रति १७ बालान्सुतानंडगतान्सहमात्रामुनिर्वने तस्मिन्गतेमहाभागेऽथ
तांप्रति[illegible]भारत १८ अपत्यस्नेहसंयुक्ताजरिताबह्वचिंतयत् तेनत्यक्तानसंत्याज्यानृषीनंडगतान्वने १९ नजहौपुत्रशोका
र्त्ताजरिताखांडवेसुतान् १९ बभारचैतान्संजातान्स्ववृत्त्यास्नेहविक्लवा ततोग्निंखांडवंदग्धुमायांतंदृष्टवानृषिः मंदपालश्चरंस्त
स्मिन्वनेलपितयासह २० तंसंकल्पंविदित्वाग्नेर्ज्ञात्वापुत्रांश्चबालकान् सोभितुष्टावविप्रर्षिर्ब्राह्मणोजातवेदसं २१ पुत्रान्प्रति
वदन्भीतोलोकपालंमहौजसं मंदपालउवाच त्वमग्नेसर्वलोकानांमुखंत्वमसिहव्यवाट् त्वमंतःसर्वभूतानांगूढश्चरसिपावक २३
त्वामेकमाहुःकवयस्त्वामाहुस्त्रिविधंपुनः त्वामष्टधाकल्पयित्वायज्ञवाहमकल्पयन् २४ त्वयिविश्वमिदंसृष्टंवदंतिपरमर्षयः
त्वदृतेहिजगत्कृत्स्नंसद्योनश्येद्धुताशन २५

यंच अष्टधायंचभूतात्मनासूर्यचंद्रयजमानरूपेणचयज्ञवाहंयज्ञनिर्वाहकं २४ त्वयासृष्टंपूर्णाविनानश्येदृर्शनंगच्छेत् निरधिष्ठानकत्वमायोगादित्यर्थः २५ ॥

कर्मिणां त्वमेव गतिरित्याह त्वामिति २६ पालनं संहारश्च त्वदैवकर्मणीत्याह त्वामिति हेतयो ज्वालाः २७ जगत्सृष्टिस्त्वत्त एवेत्याह जातवेद इति त्वदैवेति कर्मविधाय
कोवेदोपि त्वदैववाक्यं निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः २८ आप इति मूर्तां तरोपलक्षणं त्वपि अधिष्ठाभो [illegible] त्वेन फलदातृत्वेन च त्वमेवेत्याह त्वपीति २९ ३० ३१ ३२

त्वमेवं कृत्वा नमो विप्राः स्वकर्मविजितां गतिं गच्छंति सहपत्नीभिः सुतैरपि च शाश्वतीं २६ त्वामग्ने जलदानाहुः खे विषक्ता
न्सविद्युतः दहंति सर्वभूतानि त्वत्तो निष्क्रम्य हेतयः २७ जातवेदस्त्वयैवेदं विश्वं सृष्टं महाद्युते त्वदैव कर्मविहितं भूतं सर्वं चराचरं
२८ त्वयापो विहिताः पूर्वं त्वयि सर्वमिदं जगत् त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितं २९ त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः
त्वमश्विनौ यमौ मित्रः सोमस्त्वमसि चानि[illegible]लः ३० वैशं एवं स्तुतस्तदा तेन मंदपालेन पावकः तुतोष तस्य नृपते मुनेरमित
तेजसः ३१ उवाच चैनं प्रीतात्मा किमिष्टं करवाणि ते तमब्रवीन्मंदपालः प्रांजलिर्हव्यवाहनं ३२ प्रदहन् खांडवं दावं मम
पुत्रान्विसर्जय तथेति तत्प्रतिश्रुत्य भगवान्हव्यवाहनः खांडवे तेन कालेन प्रजज्वाल दिधक्षया ३३ आदिपर्वणि खां
डवदाहे वैशं ततः प्रज्वलिते वह्नौ शार्ङ्गकास्ते सुदुःखिताः व्यथिताः परमोद्विग्ना नाधिजग्मुः परायणं १ ॥

खांडववने तेन हेतुना कालेदाहवेलायां शार्ङ्गकाणां दिधक्षया न प्रजज्वाल ३३ अध्यायः ततः परायणं त्रातारं १ ॥ ॥ ॥ ॥ ॥ ॥

निशम्यआलोच्य १ कक्षंवनं ३ कर्षयंतिपीडयंतिअबर्हाः अजातपक्षाः परायणंत्रातारः ४ सरणेगमने ५ सरितुंवनंलंघितुं निःसारयितुमंततइतिपाठेअंततः

निशम्यपुत्रकान्बालान्मातातेषांतपस्विनी जरितादुःखशोकार्त्ताविललापसुदुःखिता १ जरितोवाच अयमग्निर्दहन्कक्ष
मितआयातिभीषणः जगत्संदीपयन्भीमोममदुःखविवर्द्धनः ३ इमेचमांकर्षयंतिशिशवोमंदचेतसः अबर्हाश्चरणैर्हीनाःपूर्वेषां
नःपरायणाः ४ त्रासयंश्चायमायातिलेलिहानोमहीरुहान् अजातपक्षाश्चसुतानशक्ताःसरणेमम ५ आदायचनशक्तोस्मि
पुत्रान्सरितुमात्मना नचत्यक्तुमहंशक्ताहृदयंदूयतीवमे ६ कंनुजह्यामहंपुत्रंकमादायव्रजाम्यहे किंनुमेस्यात्कृतंकृत्वाकिंवाम
न्यतपुत्रकाः ७ चिंतयंतीविमोक्षंवोनाधिगच्छामिकिंचन छादयिष्यामिवोगात्रैः करिष्येमरणंसह ८ जरितारौकुलंह्येतत्
ज्येष्ठत्वेनप्रतिष्ठितं सारिसृक्कःप्रजायेतपितॄणांकुलवर्धनः ९ स्तंबमित्रस्तपःकुर्यात्द्रोणोब्रह्मविदांवरः इत्येवमुक्त्वाप्रययौ
पितावोनिर्घृणःपुरा १० कमुपादायशक्येयंगंतुंकष्टापदुत्तमा किंनुकृत्वाकृतंकार्यंभवेदितिचविह्वला ११ नापश्यत्स्वधि
यामोक्षंस्वसुतानांतदानलात् वैशं एवंब्रुवाणांशार्ङ्गास्तांप्रत्यूचुरथमातरं स्नेहमुत्सृज्यमातस्त्वंपतयत्रनहव्यवाट् १२ अ
स्मासुहिविनष्टेषुभवितारःसुतास्तव त्वयिमातर्विनष्टायांननःस्यात्कुलसंततिः १३ ॥ ॥ ॥

निरग्निर्देशे ६ किंनु किंकृत्वाहंकृतकृत्यास्यामित्यर्थः ७ ८ प्रजायेतप्रजात्वेनोत्पद्येत ९ १० गंतुंलंघितुं ११ पतगाश्च १२ १३ ॥

आ॰ ३७५ १४ नोस्माकं सर्वविनाशाय सर्वेषां विनाशाय सुतेषु स्नेहं मा कार्षीरिति च संबंधः १५ १७ विहंतुं दूरीकर्तुं वादो वचनं १८ क्रव्यादाखुः मांसादः उंदुरः पश्यमानाः पश्यंतः १९ मोघः

अन्ववेक्ष्यैतदुभयं क्षमं स्यात्तत्कुलस्य नः तदैकं तु परः कालो मा ते रोषमवेतव १४ मा त्वं सर्वविनाशाय स्नेहं कार्षीः सुतेषु नः नही
दं कर्म मोघं स्याल्लोककामस्य नः पितुः १५ जरितोवाच इदमाखोर्बिलं भूमौ वृक्षस्यास्य समीपतः तदाविशध्वं त्वरिता वह्नेरत्र न वो भ
यं १६ ततोहं पांसुना छिद्रमपिधास्यामि पुत्रकाः एवं प्रतिकृतं मन्ये ज्वलतः कृष्णवर्त्मनः १७ तत एष्याम्यतीतेग्नौ विहंतुं पांसुसंच
यं रोचतामेष वो वादो मोक्षार्थं वहुताशनात् १८ शार्ङ्गा ऊचुः अबर्हान्मांसभूतान्नः क्रव्यादाखुर्विनाशयेत् पश्यमाना भयमिदं प्र
वेष्टुं नात्र शक्नुमः १९ कथमग्निर्न नो धक्ष्येत्कथमाखुर्न नाशयेत् कथं न स्यात्पिता मोघः कथं माता ध्रियेत नः २० बिल आखो
विनाशः स्यादग्नेराकाशचारिणां अन्ववेक्ष्यैतदुभयं श्रेयान्दाहो न भक्षणं २१ गर्हितं मरणं नः स्यादाखुना भक्षिते बिले शि
ष्टादिष्टः परित्यागः शरीरस्य हुताशनात् २२ इत्यादिपर्वणि खांडवदाहे जरितोवाच अस्माद्बिलान्निष्पतितमाखुं श्येनो जहार तं
क्षुद्रं पद्भ्यां गृहीत्वा च याता नात्र भयं हि वः १ शार्ङ्गा ऊचुः न हृतं तं वयं विद्मः श्येनेनाखुं कथंचन अन्येपि भवितारोत्र तेभ्योपि
भयमेव नः २ ॥ राम ३७५

निःफलापत्यो पि ध्रियेत जीवनेन २१ शिष्टैरादिष्टः शिष्टादिष्टः इति भारतभावदीपे अध्यायः २२८ श्लोकसंख्या ८३५५

वह्निरागच्छेदित्यत्र संशयः यतो वायोः सकाशाद्वह्निनिवर्त्तनं दृष्टं ३ ५ ६ दिवं आस्थाय निरमित्रः अशत्रुर्भव अक्षयः स्वर्गस्थितो भवेति भावः हिरण्मयः दिव्यदेहः
७ प्रत्युपायां प्रत्यागतवती अस्मि ८ ९ १० ११ नमिति अस्मांस्त्वत्कोगन्तुमिच्छन्मालवाभिधेयो वाममुपचारः नवासत्य इति भावः समाकुलेषु संदिग्धेषु ज्ञानेषु ज्ञात

संशयो वह्निरागच्छेद्दृष्टं वायोर्निवर्त्तनं मृत्युर्नो बिलवासिभ्यो बिले स्यान्नात्र संशयः ३ निःसंशयात्संशयितो मृत्युर्मत्तो विशि
ष्यते चर खे त्वं यथान्यायं पुत्रानाप्स्यसि शोभनान् ४ जरितोवाच अहं वेगेन तं यान्तमद्राक्षं पततां वरं बिलादाखुं समादाय श्ये
ने पुत्रा महाबले ५ तं पतन्तं महावेगं त्वरिता पृष्ठतोऽन्वगां आशिषोऽस्य प्रयुञ्जाना हरतो मूषिकं बलात् ६ यो नो द्वेष्टारमादाय
श्येनराज प्रधावसि भव त्वं दिवमास्थाय निरमित्रो हिरण्मयः ७ स यदा भक्षितस्तेन श्येनेनाखुः पतत्रिणा तदाहं तम
नुज्ञाप्य प्रत्युपायां पुनर्गृहे ८ प्रविशध्वं बिलं पुत्रा विस्रब्धा नास्ति वो भयं श्येनेन मम पश्यन्त्या हृत आखुर्महात्मना ९ शा
र्ङ्गा ऊचुः न विद्म हे हृतं मातः श्येनेनाखुं कथंचन अविज्ञाय न शक्याम प्रवेष्टुं विवरं भुवः १० जरितोवाच अहं तमभि
जानामि हृतं श्येनेन मूषिकं नास्ति वोऽत्र भयं पुत्राः क्रियतां वचनं मम ११ शार्ङ्गा ऊचुः न त्वं मिथ्योपचारेण मोक्षयेथा भ
याद्धि नः समाकुलेषु ज्ञानेषु न बुद्धिकृतमेव तत् १२ ॥

तस्या १

अकार्येषु तत्बिलप्रवेशने बुद्धिकृतं बुद्धिमहा[illegible]चरितं नैव बिलेशत्रुसद्भावशंकायां सत्यां बलात्तत्र प्रवेशो न युक्त इति भावः १२ २२ १२ ॥ ४ ॥

आः नेनेति अस्मान् अग्रेवाउपकर्त्तुं निक्षतमात्रपकास्तस्मान्किमिति विमर्षाविवयं तवकेनकेपीनर्षः त्वंवासती अस्मातकापितमात्संबंधस्य ज्ञातिकल्पितत्वादि
३७६ नर्षः १३ १४ आपाः आगच्छेनः अस्मान् १६ ततइति अग्निदाहात्प्रागेवतक्षकवत्जरितापिगता अतः दाहातषंडेवमुक्ताइतिपूर्वोक्तिर्नविरुद्ध १७ १८

नचोपपन्नंतमस्माभिर्निवासार्थेवंन्धपेवयं पीड्यमानाविमर्षस्मान्कासित्वंकेवयंतव १३ तरुणीदर्शनीयासिसमर्थाभ
र्तुरेषणे अनुगच्छपतिंमातः पुत्रानाप्स्यसिशोभनान् १४ वयमग्निंसमाविश्यलोकानाप्स्यामशोभनान् अथास्मान्नदहेद
ग्निरायास्त्वंपुनरेवनः १५ वैशं एवमुक्तातत शार्ङ्गीपुत्रानुत्सृज्यखांडवे जगामत्वरितादेशंक्षेममनग्नेरनामयं १६ ततस्ती
क्ष्णार्चिरभ्यागात्त्वरितोहव्यवाहनः पत्रशार्ङ्गीवभुवंस्तेमंदपालस्यपुत्रकाः १७ ततस्तंज्वलितंदृष्ट्वाज्वलनंतेविहंगमाः ज
रितारिस्ततोवाक्यंश्रावयामासपावकं १८ इत्यादिपर्वणिशार्ङ्गीपाख्याने जरितारिरुवाच पुरतःकृच्छ्रकालस्यधीमान्
जागर्तिपूरुषः सकृच्छ्रकालंसंप्राप्यव्यथांनैवैतिकर्हिचित् १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अध्यायःपुरतइति अन्तःसंसारारण्येऽग्नौमहामोहानलव्याप्तायांमातापिनत्रातुंसमर्थाकिंतुसर्वेस्वार्थकामा एवेतिसंसृत्यादिकृत्स्नवसवीनत्रातुंसमर्थइत्यस्मिन्न
ध्यायेच्यते कथापक्षेतुस्पष्टएवार्थः तत्रजरितारिर्नीतिनकापदिशत्पुराणात्महपुरतइतिमरणात् प्रागेवज्ञानार्थं पतितव्यंतस्वमरणाव्यथांज्ञानी नम्रा राम०
प्नोति ततस्यप्राणाउत्क्रामंतत्रैवसमवनीयंतइतिश्रुतेरित्याद्युश्लोकतत्वं कृच्छ्रकालोमरणकालः व्यथांप्राणोत्क्रमणपीडां १ ॥ ॥ ३७८
७२

एतदेव व्यतिरेकमुखेनाह यस्त्विति विवेता[illegible]ः अजितचित्तः अध्रिनो देहान्तरे नियामककर्मणा वशीकृतो महत्तत्त्वे यो मोक्षं २ उक्तमर्थ
नाशः सत्संगादेव भवतीत्सन्वयव्यतिरेकाभ्यामाह द्वाभ्यां धीरइति धीरो ध्यानवान् मेधावी ऊहापोहकुशलः अन्तकमेवास्मात् माहीति भावः
३ त्वदनुग्रहं विना नास्ति तारणोपाय इत्याह ज्येष्ठइति ४ द्रोणवाक्यस्य पंगरह अध्यात्मं दहन्तीति हिरण्यं विषयवासनामेवौरं तो वीजंप

यस्त्वकृच्छ्रमनुप्राप्तं विवेतानावबुध्यते सकृच्छ्रकालेव्यथितो नश्रेयो विन्दते महत् २ मारिसक उवाच धीरस्त्वमसि
मेधावी प्राणकृच्छ्रमिदं च नः प्राप्तः शरो बहूनां हि भवत्येको न संशयः ३ स्तंबमित्र उवाच ज्येष्ठस्त्राता भवति वै ज्येष्ठो
मुञ्चति कृच्छ्रतः ज्येष्ठश्चेन्न प्रजानाति कनीयान् किं करिष्यति ४ द्रोण उवाच हिरण्यरेतास्त्वमसि ज्वलनः पाति नः
भयं सप्तजिह्वाननः क्रूरो लेलिहानो विसर्पति ५ वैशं एवं संभाष्यमाणः सो ऽग्निं मन्दपालस्य पुत्रकाः तुष्टुवुः पृथग्नाथ
त्वायथाग्निं शृणु पार्थिव ६ ॥

यसः मोहः मारणकालिकः भयं देहगेहं एनिमजिका कालीमनोजवा धूम्रा कराली लोहिमा तथा स्फुलिंगिनी विश्वरुचिः सप्तजिका
विभावसोः पक्षे पंचेंद्रियाणि बुद्धिमनसी च तथ्युक्तं आननं मुखं भोगसाधनं यस्य सः लेलिहानो ग्रसिष्यन् विसर्पति व्याप्नोति अतः त्वमो
भायस्त्वमेव पातितव्य मिति भावः ५ एवमिति ६

एवमधिकारिणामुत्पाप्य आग्निरुक्तिमानेन तत्त्वमुपदिशति यदेतेनत्यातस्तंत्वपेसमंहारोऽग्निवाक्यात तत्वमत्यमत्रस्त्वविद्याधिकारां येसमष्टुमनांजा
तारिशहद्याभ्यां वायोःमत्रात्मनः वायुर्वैगौतमतत्सूत्रं वायुरेवव्यष्टिर्वायुः संमष्टिरितिश्रुतेः आत्मास्वरूपमसि शरीरमसि धर्मिमितिविराडात्मात्वमुक्तं। वी
राधायोनिः पृथ्वी आपश्चतेनत्वमुक्तं बीजंत्वद्रूपं अग्नेरापः अद्भ्यः पृथिवी तिश्रुतेः आपस्तेशुक्रमितस्पष्टात्मायोनिस्त्वमसिचांभसइति यद्वा
वायोरात्मा अंतरिंद्रियात्वादितं वीरुधांयोनिः पृथ्वी मरणादिना यस्पृथिव्या अधस्तात्तदापः यदि वा परिणामतरंभः तथाचलोकसृष्टिहत्ताभवति। अ

जरितारिरुवाच आत्मासिवायोर्ज्वलनशरीरमसिवीरुधां योनिरापस्तेशुक्रंयोनिस्त्वमसिचांभसः ७ ऊर्ध्वंचाधश्चसर्पंतिष्ठ
तः पार्श्वतस्तथा अर्चिषस्तेमहावीर्यरश्मयःसवितुर्यथा ८ सारिसृक्व उवाच मातापुत्रनष्टापितरंनिविद्मःपक्षाजातानै
वनोधूमकेतो नत्वत्राताविद्यतेवैत्वदन्यस्तस्मादस्मांस्त्राहिबालांस्त्वमग्ने ९ यदग्नेतेशिवंरूपंयेचतेसप्तहेतयः तेननःपरि
पाहित्वमार्तानोत्राः शरणैषिणः १०

रोभःपरेणारेणादिवंद्यौः प्रतिष्ठांतरिक्षमरीचयःपृथिवीमरोयाअधस्तात्ताआपइत्येतरेयश्रुत्वालोकसृष्टिहत्ताभवति सद्मांलोकानसृजत
भोमरीचीमरमापइतिउपक्रम्यात्रलोकात्मत्वेनस्तुतिनैलोककर्तृत्वेनेस्तनःसमष्ट्युपासनायामेवतत्स्यामेवतसार्थं ७ ८ अत्रानधिकारी सारिसृ
क्व। रुक्मिणीगर्भायस्मसस्मारिसृक्वात्यभोगासक्तः यदिरूपमेवाग्निंप्रार्थयते मातेतिपुत्रनष्टाअदर्शनंगता ९ शिवंशान्तंलोकहितंहेतयोज्वालाः
पर्वोक्ताः १०

गोपुरं विरचितमपुरविरपित्वमेवेत्यर्थः परेणास्मात्तस्मान्नो दूरे प्रेहि परेणोतेन ववंतं २१ एवंभक्त्युपासनामिद्धस्य सार्वात्म्योपासनां संवृण
त्मिरंब्रह्मेत्यादिशास्त्रप्रसिद्धांशांडिल्यविद्यादिरूपांत्वमित्याख्यः सर्वप्राणिसमुदायस्त्वाग्न्याहसर्वमित्यादिना त्वमीदृक केनके कुंडल्यो
दिवत १२ बहुधाकार्यरूपेण एकधाकारणरूपेण १३ त्रीन्लोकान्निति ब्रह्माण्डोपलक्षणां पचसि संहरसि समिद्धः तमोगुणेन प्र

त्वमेवैकस्तपसे जातवेदो नान्यस्त्वमाविद्यते गोप्तुदेव अधीनस्मात् [illegible] बालकान्पालयस्व परेणास्मान्नेहि हि वैहव्यवाह ११
त्वंवमित्तवाच सर्वमग्ने त्वमेवैकस्त्वपि सर्वमिदं जगत त्वंधारयसि भूतानि भुवनं त्वं बिभर्षि च १२ त्वमग्निर्हव्यवाहस्त्वं
त्वमेवपरं महर्विः मनीषिणास्त्वां जानंति बहुधा चैकधापि च १३ सृष्ट्वा लोकांस्त्रीनिमान्हव्यवाह काले प्राप्ते पचसि पुनः
समिद्धः त्वं सर्वस्य भुवनस्य प्रसूतिस्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा १४ ॥ ॥छ॥ ॥

वृद्धः अत्र हेतुं श्रोतं दर्शयति त्वंसर्वस्येति प्रसूतिरुत्पत्तिः स्थानं प्रतिष्ठा लयस्थानं एतेन एष योनिः सर्वस्य प्रभवाप्ययौ हि भूता
नामिति श्रुतेरर्थो दर्शितः १४ १४

स्वा० प० यत्नुनांतः प्रज्ञमित्यादिश्रुतिप्रसिद्धं तु[illegible]पं निर्विशेषं ब्रह्मेतन्न द्रोणो ब्रह्मविदां वरस्तुस्यपक्कमानब्रह्मैतेन ह्यात्तत्तमेत्पग्निनापिद्रो[illegible]णस्यैवक्तनत्वा

त्द्रोणवाक्यस्यविषयइतिज्ञापयते अन्नवचनांतः अन्नादिवाकार्योनहरुपतेः तः कष्टमेतत्स्फुरतिवलेनैवसष्टीकुर्मः त्वमन्नमिति हेजग

३७८ त्पतेत्वंअन्नं अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतेर्विराडसि किमसौनित्यः नेत्याह प्राणिभिर्भुक्तमिति प्राणाः सत्वान्नासरूपा

स्तेनात्तिपेषांतेप्राणिनः सत्वोपासकाः तेर्भुक्तंउपसंहृतं एतेनस्थूलसमष्टेलयउक्तः तथा अंतर्मध्येभूतानिसत्वशरीरारंभकाणि

द्रोणउवाच त्वमन्नंप्राणिभिर्भुक्तमंतर्भूतोजगत्पते
नित्यंप्रवृद्धः पचसित्वयिसर्वंप्रतिष्ठितं ॥ १५ ॥

अपंचीकृतवियदादीनियस्यसः अंतर्भूतोसिभूतलयस्थानमप्यसि एतेनसूक्ष्मसमष्टिकारणेविलापनमुक्तं अतएवजगतः स्थूलसूक्ष्म

कार्यस्ययतेस्तृष्टिसंहारयोः स्वतंत्रात्वंनित्यप्रवृद्धोसि कार्यकारणब्रह्मणोः सोपाधिकयोरुपाधितिरोभावाविर्भावानुसारिप्रवृद्धं निरुपाधिक राम०

स्यतुनित्यमेवंत त्वयिसुदृढप्रतिष्ठितं सर्वकार्यकारणात्मकं ज्ञामिवोरगादिकर्मीभूतंत्वंपचसिसंहरसि एवंचनांतः प्रज्ञंनबहिः प्रज्ञंनोभय ३७८

तः प्रज्ञमित्यादिश्रुतेरर्थः स्थूलसूक्ष्मकारणरूपातीतं विनिष्कलंशिवत्वाद्यभिधेयंप्रतिपादितं ॥ १५ ॥ १५

सर्पेइति हेमुकुन्द मुक्तसर्वोपाधिकालुष्यहीन त्वंसर्पोभूत्वा रसानारायपुनस्तत्क्षणकालेभावयसी । तिसंबंधः त्वमहंमाहीनां रसानिश्चा
रायसेहत्वसर्पेः कारणात्मा भूत्वाबीजमात्ररूपेणस्थित्वापुनः प्रबोधकालेवृत्स्माविनस्मात्प्रदानेनपृथिव्यारीनिजनयसीत्यर्थः १६
रसस्यब्रह्मसत्तापात्र्याप्रमत्वनहद्रूपमानाः सन्तदिति प्रसर्पविषयभूतावीरुधारयः जडपदार्था अपित्वज्जए बोसत्वाइत्यर्थः तेनप्रधा
नादेः कारणत्वंनिरस्तं सभद्रस्येत्यत्रमुद्रस्येतिपाठमहोदधिशब्देनमहांनिब्रह्मांडेहर्हिः स्थितानित्तरकानिनिधीयंतेस्मिंनितिमुत्त

सर्पोभूत्वाऽग्निमभिजीनवेदोभूमेरसाभूमिजानानरसांश्च विष्णानारायपुनस्तत्क्षणकालेवृत्स्मावृक्षाभावयसीह
मुक्त १६ त्वतएताःपुनःमुक्तवीरुधोहरितच्छदाः जायंतेयुष्मत्कारणपस्वसभद्रस्यमहोदधिः १७ इदवैसप्रतिमां
गोवहणस्य परायणंशिवस्त्वानाभवास्माकंमास्मानघविनाशय १८ पिंगाक्षलोहितग्रीवकृष्णवर्त्मन्हुताश
न पोषणप्रैहिमुंचास्मानसागरस्यगृहानिव १९ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥

सत्साःनेकब्रह्मांडशुक्तिसंपुटाश्रयभूतोजलावरणरूपः समुद्रोयात्यः तत्त्वावरणांतरणामसमुपलक्षणं १७ एवंपरापरब्रह्मरूपेण
ग्निंस्तुत्वोडपच्छिन्नभयानिवर्तनिंप्रार्थयतेस्रहमिति हेतिग्मांशोतीक्ष्णकरा वह्नेत्वमेवसमशारीरंवरुणस्यरसनेंद्रियाधिपतेःपराय
णाश्रयस्तत्वावलंबनं पश्चिदेहेनहिसर्वरसास्वादोलभ्यते अतस्त्वंशिवःअंतएवास्माकंत्राताभव १८ सागरस्यगृहान्नदी
प्रवाहोनिवस्त्रनभिमायानस्वाभिभावकाश्चत्रातामेव १९

आ० पर्व० प्रतीतात्मात्रष्टः २० २१ मत्यंमम २२ २५ अथायः मंदा उक्तामम पुत्रान्मादहेति प्रार्थ्यापि १ त्राणेगृहे। कथंतनकथमपि ३ ४

१५३

३७९

वैशं०पा० एवमुक्तोजातवेदाद्रोणेनब्रह्मवादिना द्रोणमाहप्रतीतात्मामंदपालप्रतिज्ञया २० अग्निरुवाच ऋषिद्रो
णास्त्वमसिवैब्रह्मत्तेनध्यातंतत्त्वया ईप्सितंतेकरिष्यामिनचतेविद्यतेभयं २१ मंदपालेनवैयूयंममपूर्वंनिवेदिताः वर्जयेः
पुत्रकान्मत्यंदहन्दावमितिस्मह २२ तस्यतद्वचनंद्रोणपापश्चेहभाषितं उभयमेवगृहीष्यत्क्षब्रूहिकिंकरवाणिते भ
शंप्रीतोस्मिभद्रंतेब्रह्मंस्त्राताचेणासत्तम २३ द्रोणउवाच इमेमार्जारकाः शुक्रनित्यमुद्वेजयंतिनः एतान्कुरुष्वदंष्ट्रांस्त्वंहुताशवा
नसंबाधवाच २४ तथातत्कृतवानग्निरभ्यनुज्ञायशार्ङ्गकान् ददाहखांडवंदावंसमिद्धोजनमेजय २५ आदिपर्वणि
खांडवदाहेशार्ङ्गोपाख्यानेवैशं० मंदपालोपिकौरव्यचिंतयामासपुत्रकान् उक्तापिचसतिग्मांशुर्नेवशर्मीधिगच्छति १
संतप्यमानः पुत्रार्थेजरितामिदमब्रवीत् कथंत्वशक्ताःशरणेलपितेममपुत्रकाः २ वर्द्धमानेहुतवहेवातेचाशुप्रवायं
ति असमर्थाविमोक्षायभविष्यंतिममात्मजाः ३ कथंतुशक्तात्राणायमातातेषांतपस्विनी भविष्यतिहिशोकार्ता
पुत्रत्राणमपश्यती कथमुड्डीपनेशक्तान्पतनेचममात्मजान् संतप्यमानाबहुधावाशमानाप्रधावति ५

उड्डीपनेऊर्ध्वपतने पातनेतिर्यग्गमने वाशमानारुदंती ५ ॥७॥ ॥७॥

राम०
३७९

६ ८ परीताः त्रापिताः ९ समक्षमिति हे त्वस्य तेनावमानमंतेन हेतुना वंधुकृत्वलक्षणोरक्षणोसमक्षंत्वभित्रुवंन १० किंतु नानैवेतिसपर्णांश्चे ११
नहीति पक्षवंतास्सहायवता सहज्ज्वलनेनदिग्धेहेन निनाशंसेहवनांशकेनवपीड्यमान त्वात्मापुत्रदारां रूपं कथं च न उपद्रुतुं त्वपेक्षितं नहि त्वाद्यं १२

जरितारिः कथं पुत्रः सारिसृक्वः कथं च मे स्तंबमित्रः कथं द्रोणः कथं सा च तपस्विनी ६ लालप्यमानं तमृषिं मंदपालं तथा वने
लपिता प्रत्युवाचेदं सासूयमिव भारत ७ न ते पुत्रेष्ववेक्षास्ति यानृषीनुक्तवानसि तेजस्विनो वीर्यवंतो न ते तेषां ज्वलनाद्भ
यं ८ त्वयाग्नौ ते परीताश्च स्वयं हि मम संनिधौ प्रतिश्रुतं तथा चेति ज्वलनेन महात्मना ९ लोकपालो न तां वाचमुक्त्वा
मिथ्या करिष्यति समर्थं वै वक्तुं से न ते न तेषां स्वस्थमानसं १० तामेव तु ममामित्रां चिंतयन्परितप्यसे ध्रुवं मयि न ते स्नेहो
यथा तस्यां पुराभवत् ११ न हि पक्षवता न्याय्यं निःस्नेहेन सुहृज्जने पीड्यमान उपद्रष्टुं शक्तेनात्मा कथं च न १२ गच्छ त्वं
जरितामेव यदर्थं परितप्यसे चरिष्याम्यहमप्येका यथा कापुरुषाश्रिता १३ मंदपाल उवाच नाहमेवं चरे लोके यथा त्व
मभिमन्यसे अपत्यहेतोर्विचरे तच्च कृच्छ्रगतं मम १४ भूतं हित्वा च भाव्यर्थे योऽवलंबेत मंदधीः अवमन्येत तं लोको यथेच्छ
तो १
सि तथा कुरु १५

अतस्त्वं जरितामेव गच्छेत्यधिक्षिप्याहं गच्छेति १३ एवं कामयुक्तो नाहं चरेन चरामि १४ भूतं जरिता पाममसंभाव्यर्थे त्वपि ज्ञानपितमंत्रपसे १५

जरि

२६ जरितानामतः जाता संज्ञाताश्च समाः सांगिता सर्वेद्विपथाकुला १७ १८ २४ २५ स्त्रीणांश्च समत्र परलोके पुरुषांतरएहतैसापलं

एषहिप्रज्वलन्नग्निर्लेलिहानोमहीरुहान् आविग्नेस्त्विसंतापंजनयत्यशिवंतथा १६ वैशं तस्माद्देशादतिक्रांतेज्वलने
जरितापुनः जगामपुत्रकानेवजरितापुत्रगृद्धिनी १७ सातान्कुशलिनःसर्वान्विमुक्तान्जातवेदसः रोरूयमाणान्ददर्शव
नेपुत्रान्निरामयान् १८ अश्रूणिमुमुचेतेषांदर्शनात्सापुनःपुनः एकैकंचैताऽसेवीदक्रोशमानान्नुपद्यते १९ ततोभ्यु
गच्छत्सहसामंदपालोपिभारत अथतेसर्वएवैनंनाभ्यनंदंस्ततेसुताः २० लालप्यमानमेकैकंजरितांचपुनःपुनः नैवा
ब्रुवंस्तदाकिंचित्तमृषिंसाध्वसाधुवा २१ मंदपालउवाच ज्येष्ठःसुतस्तेकतमःकतमस्तस्यचानुजः मध्यमःकतमश्चैवक
नीयान्कतमश्चते २२ एवंब्रुवंतंदुःखार्तंकिंमानप्रतिभाषसे कृतवानस्मिहित्यागंनैवशांतिमितोलभे २३ जरितोवाच
किंनुज्येष्ठेनतेकार्यंकिमनंतरजेनते किंवामध्यमजातेनकिंकनिष्ठेनवापुनः २४ यात्वंमामसर्वस्वोहीनामुत्सृज्यासिगतः
पुरा तामेवलपितांगच्छतरुणींचारुहासिनीं २५ मंदपालउवाच नस्त्रीणांविद्यतेकिंचिदमत्रपुरुषांतरात् सापत्नक
मृतेलोकेनान्यदर्थविनाशनं २६

कंचक्रातेः मत् । तृतीयंश्चर्य्यैनाथानंपुरुषार्थेवातकनाशिणि २६ २६ ॥छ॥ ॥छ॥

न४

राम०
३८०

वृद्दुमपंनिंदतिवैराग्नीति एतच्चापीहार्थपेसतीनामपीत्याह सुव्रतेति २७ २८ निमित्तमकुशलसूचकमिव पश्यति कपटेन अतएवनाभिरूपा पुत्र
त्रवेषा तेनहेतुनालक्ष्यालक्ष्याच २९ इष्टं आपृ तथाऽरुंधतीवचांकमानात्वमिवमापितथैवमपिअपत्यहेतोर्व्याकुलेसतिमालपिनापितथैव

वैराग्निदीपनंचैवभृशमुद्वेगकारिच सुव्रताचापिकल्याणीसर्वभूतेषुविश्रुता २७ अरुंधतीमहात्मानंवसिष्ठंपर्यशंकत
विशुद्धभावमत्यंतंसदाप्रियहितेरतं २८ सप्तर्षिमध्यगंवीरमवमेनेचतंमुनिं अपध्यानेनसातेनधूमारुणसमप्रभा २९
लक्ष्यालक्ष्यानाभिरूपानिमित्तमिवपश्यति अपत्यहेतोःसंप्राप्तंतथात्वमपिमामिह इष्टमेवंगतेहित्वंसातथैवाप्रवर्तते ३०
नहिस्त्रीष्वितिविश्वासःकार्यःपुंसाकथंचन नहिकार्यमनुध्यातिनारीपुत्रवतीसती ३१ वैशंपायनउवाच ततस्तेसर्वएवैनं
पुत्राःसम्यगुपासते सचतानात्मजान्सर्वानाश्वासयितुमुद्यतः ३२ इत्यादिपर्वणिशार्ङ्गोपाख्याने मंदपालउवाच युष्माक
मपवर्गार्थंविज्ञप्तोज्वलनोमया। अग्निनाचतथेत्येवंप्रतिज्ञातंमहात्मना १ अग्नेर्वचनमाज्ञायमातुर्धर्मज्ञतांचवः भवतां
चपरंवीर्यंपूर्वंनाहमिहागतः २

वर्तते ३० अतःस्त्रीणामाप्तोनास्तीत्याह नहीति कार्यंभर्तृशुश्रूषादि अनुध्यातिमनसिकरोति ३२ अध्यायः युष्माकं १ मातुर्धर्मज्ञतां
चवःमातुःवःयुष्माकंसंबंधिनपाधर्मज्ञतां युष्मदीयंपरधर्मज्ञानंमातुरस्तीतिविज्ञायेत्यर्थः २

श्लो: २

नसंतापोहिवःकार्यःपुत्रकाहृदिमांप्रति ऋषीन्वेदहुताशोपिब्रह्मतद्विदितंचवः ३ वैशंपायनउवाच एवमाश्वा
सितान्पुत्रान्भार्यामादायसद्विजः मंदपालस्ततोदेशादन्यंदेशंजगामह ४ भगवानपितिग्मांशुःसमिद्धःखांडवं
ततः ददाहसहकृष्णाभ्यांजनयन्जगतोहितं ५ वसामेदोवहाःकुल्यास्तत्रपीत्वाचपावकः जगामपरमांतृप्तिंद
र्शयामासचार्जुनं ६ ततोंतरिक्षाद्भगवानवतीर्यपुरंदरिः मरुद्गणैर्वृतःपार्थंकेशवंचेदमब्रवीत् ७ कृतंयुवाभ्यां
कर्मेदममरैरपिदुष्करं वरान्वृणीतंतुष्टोस्मिदुर्लभंपुरुषेष्विह ८ वैशंपायनउवाच पार्थस्तुवरयामासशक्रादस्त्रा
णिसर्वशः प्रदातुंतच्चशक्रस्तुकालंचक्रेमहाद्युतिः ९ यदाप्रसन्नोभगवान्महादेवोभविष्यति तदातुभ्यंप्रदास्या
मिपांडवास्त्राणिसर्वशः १० अहमेवचतंकालंवेत्स्यामिकुरुनंदनः तपसामहताचापिदास्यामिभवतोप्यहं ११
आग्नेयानिचसर्वाणिवायव्यानिचसर्वशः मदीयानिचसर्वाणिग्रहीष्यसिधनंजय १२ वासुदेवोपिजग्राहप्रीतिंपा
र्थेनशाश्वती ददौसुरपतिश्चैववरंकृष्णायधीमते १३ एवंदत्वावरंताभ्यांसहदेवैर्मरुत्पतिः हुताशनमनुज्ञाप्यजगाम
त्रिदिवंप्रभुः १४

वि ४

आ०
३८१

आ० पर्व०
३८२

१५ १६ चरंतंयत्रवांछितमित्यनेनाप्रतिहतगतिंत्वद्वयोरपिदत्तंमयेत्यर्थः १७ १८ १९ इतिश्रीमत्सदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंश

पावकश्चतदादावंदग्ध्वासमृगपक्षिणं अहानिपंचचैकंचविरराममसुतर्पितः १५ जग्ध्वामांसानिपीत्वाचमेदांसिरुधि
राणिच युक्तः परमयाप्रीत्यातावुवाचाच्युतार्जुनौ १६ युवाभ्यांपुरुषाग्र्याभ्यांतर्पितोस्मियथासुखं अनुजानामि
वांवीरौचरंतंयत्रवांछितं १७ एवंतौसमनुज्ञातौपावकेनमहात्मना अर्जुनोवासुदेवश्चदानवश्चमयस्तथा
१८ परिक्रम्यततः सर्वेत्रयोपिभरतर्षभ रमणीयेनदीकूलेसहिताः समुपाविशन् १९ ॥ ॥इतिश्रीमहा
भारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआदिपर्वणिखांडवदाहः समाप्तः ॥छ॥ ॥छ॥

वंतसपोधिंदसूरिसूनोः श्रीनीलंकठसकृतौभारतभावदीपेआदिपर्वणिखांडवदाहार्थप्रकाशः समाप्तस्थायंआदिपर्वणिभावदीपः ॥ ॥

राम०
३८२

ॐ

आदपर्वपत्रे ३८८ श्रीरमहाभारतजी रघुनीत [illegible] वस्मी

जेगमेतका श्री श्रीवजीरीमत जेम्सकी ॐ नमजीमहाय

आदिपर्व
३८२

[illegible] ३८२

गोपीजनवल्लभाय नमः ॥ ॥ श्रीमद्गोपालनाम्नस्य श्रीलक्ष्मणपदानुगः श्रीनीलकंठो भावदीपं कुरुते शांतिपर्वणि १ यस्माधनेष्वहत्वार्थमिति
सोपमीरितः धर्मार्थकाममोक्षास्ते सम्यगत्र निरूपिताः २ धर्मादित्रयमर्थकामकरणप्रीत्यर्थमित्यल्पकाः धीशुद्धिकृतजीवनार्थकतया मुक्त्यर्थमि
सुत्तमाः स तत्पांडवधार्तराष्ट्रचरितव्याजमिषाद्दर्शितं येनासौ निजवाक्यजातहृदयं महेद्व्यासादराद ३ तत्र तावद्धौतो राजधर्माख्याः कोऽस्त्र यः क्र
भेणाविभ्रंसमापन्नस्य विरक्तस्य चोपकारकास्ते धर्म्या हितत्वात्प्रथमं राजधर्मेण राजशब्दार्थश्चात्र प्रकरणान्तरेणानुरंजनकाम्यते येति वक्ष्य
माणानिर्वचनानुसारेण च समानप्रकारेण सर्वा रंजयति प्रजा इति मनुक्तेर याति न नृपते धर्मं च वक्ष्यामिहितकाम्यपयति वृद्धपराशरेणापि

ॐ ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ वैशंपायन उवाच
कृतोदकास्ते सुहृदां सर्वेषां पांडुनंदनाः विदुरो धृतराष्ट्रश्च स[र्वा]श्च भरतस्त्रियः २ ॥ ॥ ॥

र्ववर्णसाधारणं नृपतिशब्दप्रयोगाच्च यः प्रजारंजनं करोति स एव बोध्यः स च क्षत्रियोऽक्षत्रियो वा उत्पानेन सदा पुत्रोत्पादिना वक्ष्यमा
णान् उत्पानादीन्धर्माननुतिष्ठेत् तत्रापि यः कामलोभादिहीनोऽसंततनिर्विराः केवलं प्रजापालनजं धर्ममात्रं कामयते स एव राज्याऽर्हः
युधिष्ठिरो द्राहरणेन प्रथमं निरूपयति कृतोदकास्ते सुहृदामित्यादिना नमो धर्माय महते इत्यतः प्राक्तनेन ग्रंथेन कृतोदकाः कृतप्रेततर्पणाः
हृदामित्यनेनैव दुर्योधनादीनामपि ग्रहणं मरणान्तानि वैराणीति न्यायेन तेषामपीदानीं सुहृत्त्वात् १ ॥ ॥ ॥ राम० १

ब्रह्मास्त्रमिति रहस्यं तत्प्रसादनविधिः निवर्त्तनं उपसंहारः ताभ्यां सहितं सरहस्यनिवर्त्तने ११ ब्रह्मास्त्रमिति त्वं तु ब्रह्मक्षत्रेतरत्वान्न विधार्ह इत्यर्थः १२ ॥

ब्रह्मास्त्रं वेत्तुमिच्छामि सरहस्यनिवर्त्तनं अर्ज्जुनेन समं चाहं युध्येयमिति मे मतिः ९ समः शिष्येषु वः स्नेहः पुत्रे चैव तथा ध्रु-
वं त्वत्प्रसादान्न मां ब्रूयुः कृतास्त्रं विचक्षणाः १० द्रोणस्तथोक्तः कर्णेन सापेक्षः फाल्गुनं प्रति दौरात्म्यं चैव कर्णस्य वि-
दित्वा तमुवाच ह ११ ब्रह्मास्त्रं ब्राह्मणो विद्याद्यथावच्चरितव्रतः क्षत्रियो वा तपस्वी यो नान्यो विद्यात्कथंचन १२
इत्युक्तोंगिरसां श्रेष्ठमामंत्र्य प्रतिपूज्य च जगाम सहसा रामं महेंद्रं पर्वतं प्रति १३ स तु राममुपागम्य शिरसाभिप्र-
णम्य च ब्राह्मणो भार्गवोस्मीति गौरवेणाभ्यगच्छत १४ रामस्तं प्रतिजग्राह पृष्ट्वा गोत्रादि सर्वशः स उक्तः स्वाग-
तं चेति प्रीतिमांश्चाभवद्भृशं तत्र कर्णस्य वसतो महेंद्रे स्वर्गसम्मिते १५ गंधर्वै राक्षसैर्यक्षैर्देवैश्चासीत्समागमः
स तत्रेष्वस्त्रमकरोद्भृगुश्रेष्ठाद्यथाविधिः १६ प्रियश्चाभवदत्यर्थं देवदानवरक्षसां स कदाचित्समुद्रांते विचचा-
राश्रमांतिके १७ एकः खड्गधनुःपाणिः परिचक्राम सूर्यजः सोग्निहोत्रप्रसक्तस्य कस्यचिद्ब्रह्मवादिनः १८
जघानाज्ञानतः पार्थ होमधेनुं यदृच्छया तदज्ञानकृतं मत्वा ब्राह्मणाय न्यवेदयत् १९ कर्णः प्रसादयंश्चैवमिदमित्यब्र-
वीद्वचः २० ॥

गुरोरेव पितेत्यभिसंधायाह ब्राह्मणो भार्गवोस्मीति १६ समुद्रांते दक्षिणसमुद्रसमीपे १७ होमधेनुकर्णपर्वोक्तदिशा ॥ वत्सवधे पुवात्र धेनुर्वधो

शां०
५

२६ अव्याहृतंमेव्याहृतंतुसुगमः पाठः अनुक्तंतद्वदन्यथेत्यर्थः केवलंतत्स्मीयथास्मात्तथा यत्तेकार्यंतद्वासमाचरेत्यर्थः २८ द्वितीयोध्यायः कर्ण

अबुद्धिपूर्वंभगवन्धेनुरेषाहतातव मयातत्रप्रसादंचकुरुष्वेतिपुनःपुनः २१ तंसविप्रोब्रवीत्क्रुद्धोवाचानिर्भर्त्सयन्निव दुरा
चारवधार्हस्त्वंफलंप्राप्नुहिदुर्मते २२ येनविस्पर्द्धसेनित्यंयदर्थंघटसेनिशं युध्यतस्तेनतेपापचक्रंभूमिर्ग्रसिष्यति २३ शि ८
ततश्चक्रेमहीग्रस्तेमूर्द्धानंतेविचेतसः पातयिष्यतिविक्रम्यशत्रुर्गच्छनराधम २४ यथेयंगौर्हतामूढप्रमत्तेनत्वया
मम प्रमत्तस्यतथारातिःशिरस्तेपातयिष्यति २५ ततःप्रसादयामासततस्तंद्विजसत्तमं गोभिर्धनैश्चरत्नैश्चसवै
नैपुनरब्रवीत् २६ नहिमेव्याहृतंकुर्यात्सर्वलोकोपिवैमृषा गच्छवातिष्ठवायद्वाकार्यंतत्तेसमाचर २७ इत्युक्तो
ब्राह्मणेनाथकर्णोदैन्यादधोमुखः राममभ्यगमद्भीतस्तदेवमनसास्मरन् २८ इतिश्रीमहाभारतेशांतिपर्व
णिराजधर्मेकर्णशापः १ नारदउवाच कर्णस्यबाहुवीर्येणप्रश्रयेणदमेनच तुतोषभृगुशार्दूलोगुरुशुश्रूष
यातथा १ तस्मैससविधिवत्कृत्स्नंब्रह्मास्त्रंसनिवर्त्तनं प्रोवाचाखिलमव्यग्रंतपस्वीतत्तपस्विने २ विदि
तास्त्रस्ततःकर्णोरममाणोश्रमेभृगोः चकारैवंधनुर्वेदेयत्नमद्भुतविक्रमः ३

स्येतिप्रश्रयेणेतिपाठः तुतोषेत्यादिदमेनइंद्रियजयेन १ कृत्स्नंसरहस्यंनतुमंत्रमात्रं अखिलंअंगप्रत्यंगदेवताराधनसहितं अव्यग्रंप शां०
थास्यात्तथातपस्वीएकाग्रचित्तः २ अश्रमेश्रमवर्जितआश्रमेइत्यर्थः ३ ५

विस्रंभोविश्वासः ९ क्षेप्तुंदूरीकर्तुंमपातनिद्राभंगभयात् १२ सूचीभिरिवतीक्ष्णैःरोमभिःसंहतं संनिरुद्धांगंत्रासेनसंकुचितांगं नामप्रसिद्धंनाम

ततःकदाचिद्रामस्तुचरन्नाश्रममंतिकात् कर्णेनसहितोधीमानुपवासेनकर्षितः ४ क्षुधापजामदग्न्योवैविस्रं
भोत्पन्नसौहृदः कर्णस्योत्संगआधायशिरःक्लांतमनागुरुः ५ अथकृमिःश्लेष्ममेदोमांसशोणितभोजनः दारु
णोदारुणस्पर्शःकर्णस्याभ्याशमागतः ६ सतस्योरुमथासाद्यबिभेदरुधिराशनः नचैनमशकत्क्षेप्तुंहंतुंवापिगुरो
र्भयात् ७ संदश्यमानस्तुतथाकृमिणातेनभारत गुरोःप्रबोधनाशंकीतमुपैक्षतसूर्यजः ८ कर्णस्तुवेदनांधैर्या
दसह्यांविनिगृह्यतां अकंपयन्नव्यथयन्धारयामासभार्गवं ९ यदास्यरुधिरेणांगंपरिस्पृष्टंभृगूद्वहः तदाबु
ध्यततेजस्वीसंत्रस्तश्चेदमब्रवीत् १० अहोस्म्यशुचितांप्राप्तःकिमिदंक्रियतेत्वया कथयस्वभयंत्यक्त्वायथा
तथ्यमिदंमम ११ तस्यकर्णस्तदाचष्टकृमिणापरिभक्षणं ददर्शरामस्तंचापिकृमिंसूकरसन्निभं १२ अष्ट
पादंतीक्ष्णदंष्ट्रंसूचीभिरिवसंवृतं रोमभिःसंनिरुद्धांगमलर्कंनामनामतः १३ सदृष्टमात्रोरामेणकृमिःप्राणानवा
सृजत् तस्मिन्नेवासृजिक्लिन्नस्तदद्भुतमिवाभवत् १४ ततोंतरिक्षेददृशेविश्वरूपःकरालवान् राक्षसोलोहित
ग्रीवःकृष्णांगोमेघवाहनः १५

तोनाम्ना १३ असृजिशोणिते १४ विश्वरूपःकामरूपीकरालवान्भीषणरूपवान्मेघवाहनोमेघोपरिस्थः १५ १५ ॥ ॥

१८ देवयुगेमते २३ नकुशलंत्र्प्रमंगलं २४ कामयास्वरसेन २५ ब्रह्मक्षत्रमेयंतरेत्र्प्रन्यत्रजातं तदेवाहस्मृतंमांविद्धीति २७ कथंतर्हिब्रा

सरामंप्रांजलिर्भूत्वावभाषेप्रर्गमानसः स्वस्तितेभृगुशार्दूलगमिष्यामियथागतं १६ मोक्षितोनरकादस्मात्त्व
तामुनिसत्तम भद्रंचतेस्तुवंदेत्वांप्रियंमेभवताकृतं १७ तमुवाचमहाबाहुर्जामदग्न्यःप्रतापवान् कस्त्वंक
स्मात्त्वनरकंप्रतिपन्नोब्रवीहिततत् १८ सोब्रवीदहमासंप्राग्दंशोनाममहासुरः पुरादेवयुगेतातभृगोस्तुल्य
वयाइव १९ सोहंभृगोःसुदयितांभार्यामपहरंबलात् महर्षेरभिशापेनकृमिभूतोपतंभुवि २० अब्रवीद्धि
समांक्रोधात्तवपूर्वपितामहः मूत्रश्लेष्माशनःपापनिरयंप्रतिपत्स्यसे २१ शापस्यांतोभवेद्ब्रह्मन्नित्येवं
तमथाब्रुवं भविताभार्गवाद्रामादितिमामब्रवीद्भृगुः २२ सोहमेतांगतिंप्राप्तोयथासाद्यकुशलस्तथा त्वया
साधोसमागम्यविमुक्तःपापयोनितः २३ एवमुक्त्वानमस्कृत्ययौरामंमहासुरः रामःकर्णंचसक्रोधमि
दंवचनमब्रवीत् २४ अतिदुःखमिदंमूढनजातुब्राह्मणःसहेत् क्षत्रियस्यैवतेधैर्यंकामयासत्यमुच्यतां २५
तमुवाचततःकर्णःशापभीतःप्रसादयन् ब्रह्मक्षत्रांतरेजातंसूतंमांविद्धिभार्गव २६ राधेयःकर्णइतिमांप्रवदंति
जनाभुवि प्रसादंकुरुमेब्रह्मन्नस्त्रलुब्धस्यभार्गव २७ पितागुरुर्नसंदेहोवेदविद्याप्रदःप्रभुः अतोभार्गवइत्युक्तं

ह्मणोभार्गवोस्मीतिमिथ्यावचनंत्वयोक्तमित्यतआहपितागुरुरिति १८ ॥ ॥ २१ मयागोत्रंतवांति १८

तस्मादिति हे मूढ एतत् वधकालादन्यत्र ब्रह्मास्त्रं न प्रतिभास्यतीति न किंतु वधकाल एव न प्रतिभास्यति कालांतरे तु प्रतिभास्यत्येवेत्यर्थः ३० सदृशेन द्व
न्द्वयोग्येन पुरतः स्थितेन समेयुषः युध्यमानस्य समीमित्याज्ञिसमिषु युध इति संपर्वस्य द्रुणो युद्धार्थत्वदर्शनात् ३१ अतत्वे परशुरामवधिन तिष्ठेत ब्रह्म ब्रह्मास्त्रं ३२

तमुवाच भृगुश्रेष्ठः सरोषः प्रसहन्निव भूमौ निपतितं दीनं वेपमानं कृतांजलिं २९ यस्मान्मिथ्योपचरितो ह्यस्त्रलोभादिह
त्वया तस्मादेतद्धि ते मूढ ब्रह्मास्त्रं प्रतिभास्यति ३० अन्यत्र वधकालात्ते सदृशेन समेयुषः अब्राह्मणे नहि ब्रह्म ध्रुवं ति
ष्ठेत्कदाचन ३१ गच्छेदानीं न ते स्थानमनृतस्येह विद्यते न त्वया सदृशो युद्धे क्षत्रियो भविता युधि ३२ एवमुक्तः स रामेण
न्यायेनोपजगाम ह दुर्योधनमुपागम्य कृतास्त्रोस्मीति चाब्रवीत् ३३ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे कर्णास्त्रप्राप्तिः
तृतीयोध्यायः ३४ नारद उवाच कर्णस्तु समवाप्यैवं शस्त्रं भार्गवनंदनात् दुर्योधनेन सहितो मुमुदे भरतर्षभ १ ततः कदा
चिद्राजानः समाजग्मुः स्वयंवरे कलिंगविषये राजन् राज्ञश्चित्रांगदस्य च २ श्रीमद्राजपुरं नाम नगरं तत्र भारत राजा
नः शतशस्तत्र कन्यार्थमुपागमन् ३ श्रुत्वा दुर्योधनस्तत्र समेतान्सर्वपार्थिवान् रथेन कांचनांगेन कर्णेन सहितो
ययौ ४ ततः स्वयंवरे तस्मिन्संप्रवृत्ते महोत्सवे समापेतुर्नृपतयः कन्यार्थे नृपसत्तम ५ ॥ ॥ ॥

न्यायेन अभिवंदनादिपूर्वकं उपजगाम हृष्टं देशमिति शेषः ३३ तृतीयः कर्णस्तु समवाप्यास्त्रमिति अध्यायः सप्तार्थः १ विषये देशे २ ॥ ॥

१२ वर्षधरः षंटः १३ १४ १५ १६ १७ १८ १८ ॥ ॥

शिशुपालो जरासंधो भीष्मको वक्रएव च कपोतरोमा नीलश्च रुक्मी च दृढविक्रमः ६ शृगालश्च महाराजः स्त्रीराज्या
धिपतिर्नृपः अशोकः शतधन्वा च भोजो वीरश्च नामतः ७ एते चान्ये च बहवो दक्षिणां दिशमाश्रिताः म्लेछाचार्याश्च राजा
नः प्राच्योदीच्याश्च भारत ८ कांचनांगदिनः सर्वे शुद्धजांबूनदप्रभाः सर्वे भासुरदेहाश्च व्याघ्रा इव बलोत्कटाः ९
ततः समुपविष्टेषु तेषु राजसु भारत विवेश रंगं सा कन्या धात्रीवर्षधरान्विता १० ततः संश्राव्यमानेषु राज्ञां नामसु
भारत अत्यक्रामद्धार्तराष्ट्रं सा कन्या वरवर्णिनी ११ दुर्योधनस्तु कौरव्यो नामर्षयत लंघनं प्रत्यषेधच्च तां क
न्यामसत्कृत्य नराधिपान् १२ स वीर्यमदमत्तत्वाद्भीष्मद्रोणावुपाश्रितः रथमारोप्य तां कन्यामाजहार नराधिपः
१३ तमन्वयाद्रथी खड्गी बद्धगोधांगुलित्रवान् कर्णः शस्त्रभृतां श्रेष्ठः पृष्ठतः पुरुषर्षभः १४ ततो विमर्दः सुमहान्
राज्ञामासीद्युयुत्सतां सन्नह्यतां तनुत्राणि रथान्योजयतामपि १५ तेभ्यधावंत संक्रोधाः कर्णदुर्योधनावुभौ
शरवर्षाणि मुंचंतो मेघाः पर्वतयोरिव १६ कर्णस्तेषामापततामेकैकेन शरेण ह धनूंषि च शरांश्चान्यान्पातया
मास भूतले १७ ततो विधनुषः कांश्चित्कांश्चिदुद्यतकार्मुकान् कांश्चिदुद्वहतो बाणान् रथशक्तिगदास्तथा १८

१९ व्यपयुः व्यपगताः २१ चतुर्थः आविष्कृतेति २३ बाहुकंटकयुद्धेन बाहुकंटकं केतकपत्रं तद्वदग्रत्रवलिना दुर्बलस्य शरीरं पाघोतेतद्वाहुकंटकं ना

लाघवादाकुलीकृत्य कर्णः प्रहरतां वरः हतांस्तांश्च भूयिष्ठान् सविजिग्ये नराधिपान् १९ ते स्वयं वाहयंतो स्वान् याहि
याहीति वादिनः व्यपयुस्ते रणं हित्वा राजानो भग्नमानसाः २० दुर्योधनस्तु कर्णेन पाल्यमानोभ्ययात्तदा हृष्टः क
न्यामुपादाय नगरं नागसाह्वयं २१ इति श्रीमहाभारते शतसाहस्र्यां शांतिपर्वणि राजधर्मे दुर्योधनस्वयंवरः नारद उवाच
आविष्कृतवलं कर्णं ज्ञात्वा राजाथ मागधः आह्वयद्द्वैरथेनाजौ जरासंधो महीपतिः १ तयोः समभवद्युद्धं दिव्यास्त्रवि
दुषोर्द्वयोः युधि नानाप्रहरणैरन्योन्यमभिवर्षतोः २ क्षीणबाणौ विधनुषौ भग्नखड्गौ महीं गतौ बाहुभिः समसज्जे
तामुभावपि बलान्वितौ ३ बाहुसंकटयुद्धेन तस्य कर्णोथ युध्यत बिभेद संधिं देहस्य जरया श्लेषितस्य हि ४ स वि
कारं शरीरस्य दृष्ट्वा नृपतिरात्मनः प्रीतोस्मीत्यब्रवीत्कर्णं वैरमुत्सृज्य भारत ५ प्रीत्या ददौ स कर्णाय मालिनीं नगरी
मथ अंगेषु नरशार्दूल स राजासीत्सपत्नजित् ६ पालयामास चंपां च कर्णः परबलार्दनः दुर्योधनस्यानुमते तवापि
विदितं तथा ७ एवं शस्त्रप्रतापेन प्रथितः सोभवत्क्षितौ त्वद्धितार्थं सुरेन्द्रेण भिक्षितो वर्मकुंडले ८ ॥ ॥

मयुद्धं यथोक्तं एकां जंघां पदाक्रम्य परामुपमपाघोते केतकीपत्रवच्छत्रुर्युद्धं तत बाहुकंटकमिति जरासंधस्य संबंधी यो देहस्तस्य संधिं विभेद
४ विकारं पाटनरूपं ५ ८ ॥ ॥ ॥

रा०
८

११ रथस्यार्द्धानुकीर्त्तनात्शल्यात्तेजोवधादितिसंबंधः १५ पंचमः एतावदुक्त्वेति दध्यौ स्वात्वधजंदोषंचिंतितवान् १ पर्यश्रुनयनः परितो

सदिव्यंसहजंप्रादात्कुंडलेपरमार्चिते सहजंकवचंचापिमोहितोदेवमायया ९ विमुक्तःकुंडलाभ्यांचसहजेन
चवर्मणा निहतोविजयेनाजौवासुदेवस्यपश्यतः १० ब्राह्मणस्याभिशापेनरामस्यचमहात्मनः कुंत्याश्चवर
दानेनमाययावशतक्रतोः ११ भीष्मावमानात्संख्यायांरथस्यार्द्धानुकीर्त्तनात् शल्यात्तेजोवधाच्चापिवासुदेवन
येनच १२ रुद्रस्यदेवराजस्ययमस्यवरुणस्यच कुबेरद्रोणयोश्चैवकृपस्यचमहात्मनः १३ अस्त्राणिदि
व्यान्यादाययुद्धेगांडीवधन्वना हतोवैकर्त्तनःकर्णोदिवाकरसमद्युतिः १४ एवंशप्तस्तवभ्राताबहुभिश्चा
पिवंचितः नशोच्यःसनरव्याघ्रोयुद्धेहिनिधनंगतः १५ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेकर्णवीर्यकथ
नेपंचमोध्यायः ५ वैशंपायनउवाच एतावदुक्त्वादेवर्षिर्विरराम सनारदः युधिष्ठिरस्तुराजर्षिर्दध्यौशोकपरिप्लुतः
१ तंदीनमनसंवीरमधोवदनमातुरं निश्वसंतंयथानागंपर्यश्रुनयनंतथा २ कुंतीशोकपरीतांगीदुःखोपहत
चेतसा अब्रवीन्मधुरांभाषांकालेवचनमर्थवत् ३ युधिष्ठिरमहाबाहोनैनंशोचितुमर्हसि जहिशोकंमहा
प्राज्ञशृणुचेदंवचोमम ४ ॥

श्रुव्याप्तनयनं १ मधुरांश्राभाषांभाषणीयस्याः सातथा २ एनंकर्णं ४ ॥

राम०
८

पतितः प्रवर्त्तितः नवतु त्वं मात्रा त्वं भ्रातुः कर्मक निष्ठतां परिपालनं ज्ञापयितुं त्वया सौम्यात्रं युधिष्ठिरादिभ्यः प्रदर्शनीयमित्यर्पितमिति ६ प्रमत्तुनेनेतुं शमपि
तु ७ कालपरीतः मत्युग्रस्तः उद्धरशोशत्रूणांनि शेषनाशेन उन्मूलने १० मराजेति कर्मशिषष्ठ्यो उद्विग्नहृदयः उद्विग्नचेतनो वभूवध्यायतो वले

पतितः समयापूर्वं मात्रां ज्ञापयितुं तव भास्करेणापि देवेन पित्रा धर्मभृतां वर ५ यद्वाच्यं हितकामेन सुहृदा हित
मिच्छता तथा दिवाकरेणोक्तः स्वप्नान्ते मम चाग्रतः ६ न चैनमशकं स्नेहानुरहेवास्महकारणैः पुरा प्रत्यनुनेतुं वा ग
तुं वाप्येकतां त्वया ७ ततः कालपरीतः स वैरस्मोद्धरोणाततः प्रतीपकारी युष्माकमिति चोपेक्षितो मया ८ इत्युक्तो
धर्मराजस्तु मात्रा वाष्पाकुलेक्षणः उवाच वाक्यं धर्मात्मा शोकव्याकुलचेतनः ९ भवत्या गूढमंत्रत्वात्पीडितोस्मी
न४ त्युवाच तां शशाप च महातेजाः सर्वलोकेषु योषितः १० न गुह्यं धारयिष्यंतीत्येवं दुःखसमन्वितः स राजा पुत्र पौत्रा
णां संबंधिसुहृदां तथा स्मरन्नुद्विग्नहृदयो वभूवोद्विग्नचेतनः ११ ततः शोकपरीतात्मा सधूम इव पावकः निर्वेदम
गमद्धीमान्राजा संतापपीडितः १२ इति श्रीमहाभारते राजधर्मे स्त्रीशापः षष्ठोध्यायः वैशंपायन उवाच युधिष्ठि
रस्तु धर्मात्मा शोकव्याकुलचेतनः सुशोच दुःखसंतप्तः स्मृत्वा कर्णं महारथं १ ॥ ॥
लापतीवेति स्मृतेः वुद्धो ध्यायसां चेतनोपि ध्यायतो वेत्यादिरर्थः ११ निर्वेदं राज्यादौ वैराग्यं १२ षष्ठः युधिष्ठिरस्तु १ ॥ ॥ ॥

शां० दुःखंदेहेंद्रियादीनांतापः शोकस्तत्कृतंवैकल्यं ताभ्यांआविष्टोव्याप्तः कर्शितः कृशीकृतः १ यत्यदिभैक्ष्यमाचरिष्यामतर्हिज्ञातिवधजात्दुर्गतिर्नप्राप्ता
९ स्यादित्यर्थः लिङ्निमित्तेलृङ्क्रियातिपत्तौ २ येनावयंवृत्तार्थाः संक्षिप्तपुरुषार्थाः ज्ञातिवधेनहतभाग्याः स्मस्ततोनोअस्माकंअमित्राःसमृद्धा
र्थाइत्यर्थः ज्ञातिवधोप्यस्माकंधर्मएवेत्याशंक्याहात्मानमितिधर्मफलंयशःस्वर्गःकिंचअक्षमः उभयमपिनास्तीत्यर्थः ४ सत्यपिशास्त्रदृष्टे

आविष्टोदुःखशोकाभ्यांनिःश्वसंश्चपुनःपुनः दृष्ट्वार्ज्जुनमुवाचेदंवचनंशोककर्षितः १ युधिष्ठिरउवाच यन्नैक्ष्य
माचरिष्यामोवृष्ण्यंधकपुरेवयं ज्ञातीन्निःपुरुषान्कृत्वानेमांप्राप्स्यामदुर्गतिं २ अमित्रानःसमृद्धार्थावृत्तार्थाःकुरवः
कृताः आत्मानमात्मनाहत्वाकिंधर्मफलमाप्नुमः ४ धिगस्तुक्षात्रमाचारंधिगस्तुवलपौरुषं धिगस्त्वमर्षंयेनेमामा
पदंगमितावयं ५ साधुक्षमादमःशौचंसवैराग्यंह्यमत्सरः अहिंसासत्यवचनंनित्यानिवनचारिणां ६ वयंतुलोभा
न्मोहाच्चदंभंमानंचसंश्रिताः इमामवस्थामापन्नाराज्यलाभवुभुक्षया ७ त्रैलोक्यस्यापिराज्येननास्मान्कश्चित्प्र
हर्षयेत् बांधवान्निहतान्दृष्ट्वापृथिव्यांविजयैषिणः ८

फलेवीभत्सत्वान्निंद्यमेवापंधर्मइत्याहधिगिति वलंसहायादिपौरुषंपराक्रमः अमर्षःक्रोधःयेनआचारादिना आपदंशोकः ५ त
र्हिकोधर्मःश्रेष्ठइत्यतआहसाध्विति क्षमादिकमेवश्रेष्ठमित्यर्थः ७ ननुयुद्धेजयश्चेद्राज्यलाभोमृत्युश्चेत्स्वर्गलाभइत्युभयलोकहितंयुद्धमित्याशं शां०
क्याहनिरस्यतित्रैलोक्यस्येति ८ ॥ ९

९ हीनार्थत्वमेवाह आमिषइति आमिषे राज्ये निमित्ते अशुभं स्मानिदोहाख्यं शुनामिव इतरेषां भवति नो हि अस्माकं तु आमिषं च आमिषस्य वि
वर्जनं चेति द्वयमपीष्टं रागद्वेषविभजते १० न पृथिव्या इति पृथिव्यादेरामिषस्य वर्जनं इष्टं बंधुरूपं त्वामिषमिष्टमेव बंधुनामर्थे सर्वं त्याज्यमित्यर्थः ११
कामेति मृत्युयानं मृत्युमार्गं युद्धं मृतानां स्वर्गोपि नास्ति किंतु कामाद्याक्रांतत्वान्नरक एवास्तीत्यर्थः १२ एवं हंतृत्वेनापापं हतानां नरकं चोपपाद्य

ते वयं पृथिवीहेतोरवध्यान् पृथिवीसमान् संपरित्यज्य जीवामो हीनार्था हतबांधवाः ९ आमिषे गृध्यमा
नानामशुभं नः शुनामिव आमिषं चैव नो हीष्टमामिषस्य विवर्जनं १० न पृथिव्या सकलया न हिरण्यस्य राशिभिः
न गवाश्वेन सर्वेण ते त्याज्या य इमे हताः ११ कामामर्षपरीतास्ते क्रोधहर्षसमन्विताः मृत्युयानं समारुह्य गता
वैवस्वतक्षयं १२ बहुकल्याणसंयुक्तानिच्छंति पितरः सुतान् तपसा ब्रह्मचर्येण सत्येन च तितिक्षया १३
उपवासैस्तथेज्याभिर्व्रतकौतुकमंगलैः लभंते मातरो गर्भांस्तान्मासान्दश बिभ्रति १४ यदि स्वस्ति प्रजायंते जा
ता जीवंति वा यदि संभाविता जातबलास्ते दद्युर्यदि नः सुखं १५ इह चामुत्र चैवेति कृपणाः फलहेतुकाः ता
सामयं समारंभो निर्वृत्तः केवलोऽफलः १६ यदासां निहताः पुत्रा युवानो मृष्टकुंडलाः अभुक्त्वा पार्थिवान्भोगा
नृणान्यनपहाय च १७ पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयं॥ ॥ ॥ ॥

हतसंबंधिनां शोकं च व्युत्पादयति बहुकल्याणेत्यादिना १३ व्रतानि गौरीव्रतादीनि कौतुकानि दुर्गास्तवादीनि मंगलानि लक्ष्मीनारायणशिलादी
नि तैः १६ अनपहाय परिकृत्य अनवदायेति पाठे अपरिशोध्य पितृभ्य इति षष्ठ्यर्थे चतुर्थी १८ ॥ ॥ ॥

श्रा० यदैषामिति अर्जुनेन सह वदन्नपि मे महितां मातरं उक्तार्थसंवादाय सैन्यादाय संबोधयति हे अंबेति पितरौ माता पितरौ गांधारीधृतराष्ट्रौ यदैव जातकामौ
१० तदैव ते नृपाः दुर्योधनप्रभृतयो हताः १९ संयुक्ता इति कामार्थस्याभिलाषः मन्युस्तदलाभे दैन्यं क्रोधः कामप्रतिबंधे सत्यनुत्पन्नता हर्षो लाभे मन्युकुल्ल
अ३ तातैः अ मंजसाः कस्य पाठे समंजस इति सकारांतः शब्दः विषमाः ये पुरुषास्तेषां फलं मे मे स्वर्गस्य वाजयेन यत्फलं तत्र मोक्षो नमोक्षं मिति जातु क
दाचित्तजीवनेन मरणे वा कर्हिचित्तन्न किंचिदेवेह परत्र वा २० ननु ये हतास्तेषां स्वर्गमोक्षं यत्तेषु तस्या शंक्याह पांचालानामिति ये हतास्ते हता एव न तु स्वर्गं ग

यदैषामंब पितरौ जातकामावुभावपि संजातबलरूपेषु तदैव निहता नृपाः १९ संयुक्ताः काममन्युभ्यां क्रोधहर्षासमंजसाः
न तेजन्मफलं किंचिद्भोक्तारो जातु कर्हिचित् २० पंचालानां कुरूणां च हता एव हि मद्धताः नैवेत्सर्वान यं लोकान्न पश्ये
तस्य कर्मणा २१ वयमेवास्य लोकस्य विनाशकारणं स्मृताः धृतराष्ट्रस्य पुत्रेण निकृत्यावंचितावयं २२ सदैव निकृति
प्रज्ञो द्वेष्या मायोपजीवनः मिथ्यावृत्तश्च सततमस्मास्वनपकारिषु २३ ॥ ॥ ॥

ताः कामाद्युपेतत्वाद्युक्ते हेतोः एवं न चेत् अयं हतास्ते नैव कर्मणा निमित्तेन न स्वर्गं गतान तान्नतान पश्ये तन न च पश्यतीति लोकायतमतमाश्रित्ये
तो २१ तत्सर्वविनाशकारणत्वं प्रतिपन्नस्याति पर्यवस्यति वयं राज्यलोभाद्विनाशे वा तत्कारणं मुख्यं कारणं तु अस्मद्राज्यापहारेण धार्तराष्ट्र
एवेतिभावः २२ एतदेवाह सदैवत्यादिना निकृतिर्वंचनं तन्निष्ठैव प्रज्ञा यस्येति निकृतिप्रज्ञः मायाकपटद्यूतादि तदेवोपजीवनं यस्य स तथा श्रा० १०
मिथ्याविनीतश्च धृतराष्ट्रस्य वाग्राहः सर्वमूलत्वात् २३

पुष्यतां लोकहृदयनाशमुपपापौघौं संहरन्तं ईर्ष्येन नसकामा इति २४ कृतवतां पंडितानां रत्नानीत्यादौ भुक्तानीत्यादि र्यथालिंगं शेषः २५ त
त्र हेतुरस्मदिति हरिणः पांडुरः २७ तथागतो बुद्ध मुनिः क्षणिकबुद्धिरिति यावत् यथाहं अनवास्थित बुद्धिस्तथा धृतराष्ट्रोपीत्यर्थः २८

नसकामाव यंतेच नचास्मामिनतेर्ज्जितं नतैर्भुक्तं यमवनिर्न्नना र्योगीत वादितं २४ नामात्मसुहृदं वाक्यं न
च श्रुतवतां श्रुतं न दत्तानि पराद्ध्यानि नभूर्नेद्र विरागगमः २५ अस्मद्द्वेषेणसंतप्तः सुरवं नस्तेषु विंदति बुद्धिम
स्मात्तु तां दृष्ट्वा विवर्णो हरिणः कृशः २६ धृतराष्ट्रश्च नृपतिः सौबलेन निवेदितः तेपिता पुत्रगृद्धित्वादनुमेने नयास्य
ते २७ अनवेक्ष्यैव विदुरं गांगेयं च महामतिं असंशयं क्षयं राजा यथैवाहं तथागतः २८ अनियम्याशु विलुब्धं पुत्रं काम
वशानुगं पतितो यशसो दीप्तान् घातयित्वा महोदरान् २९ इमौ हि वृद्धौ शोकाग्नौ प्रक्षिप्य स सुयोधनः अस्मद्द्वेष
संतप्तः पापबुद्धिः सदैव हि ३० कोहि बंधुः कुलीनः संस्तथा ब्रूयात्सुहृज्जने ३२ यथायमुक्तवान्वाक्यं युयुत्सुः
कृष्णसन्निधौ आत्मनो हि वयं दोषाद्विनष्टाः शाश्वतीः समाः प्रदहंतो दिशः सर्वा भास्करा इव तेजसा ३२ ॥

सतत्फलमाह अनियम्येति २९ प्रक्षिप्य गता इति शेषः ३० युयुत्सुर्यो हु कामाः वाक्यं अस्मद्द्वेषात्पांडवानष्टा इत्येवं रूपं ३१ तदेवा
पीत आह आत्मन इति हु यो धिनेष्युपचारादात्मपदात्त्मपदप्रयोगः आत्मनो दुर्योधनस्य ३२

स्मा३४

रा०
११

मग्रहं दृढबंधनं गतः प्राप्तः नोऽस्माभिः ३३ अवध्यानां अवध्यकल्पानां भीष्मादीनां गुरुत्वाद्वा वधानर्हाणां ३४ विषयः आमिषं ३५ नोऽस्माकं सर्वेषां
मन्युः क्रोधस्तान्हत्वा विगतः मांत्विकेशाकोऽलं धपति हृताद्विरोधपतिइतिवावु कर्षयेऽलं धपतीति प्रयोगो वक्तुर्वैलक्षण्यं सूचयति कल्याणेनउपकारेण
३६ निवृत्यात्यागेन ३७ एतेषु त्यागेष्वेव प्रशंसातिगवानिति फ्रांतिस्त्यागेनैके अमृतत्वमानशुरितियदायत आह ३८ तस्मात्प्राप्तवर्त्मील

सोऽस्माकं वैरपुरुषो दुर्मतिः प्रग्रहं गतः दुर्योधनकृते ह्येतत्कुलं नो विनिपातितं ३३ अवध्यानां वधं
कृत्वा लोके प्राप्ताः स्म वाच्यतां कुलस्यास्यांतकरणाद्दुर्मतिपापकारिणां ३४ राजा राष्ट्रेश्वरं कृत्वा
क्षतराष्ट्रोऽद्य शोचति हताः शूराः कृतपापा विषयः स्वो विनाशितः ३५ हत्वा नो विगतो मन्युः शोकोऽस्माक
र्षयतीमौ धनंजय कृतपापं कल्याणेनोपहन्यते ३६ स्वापनेनानुतापेन दानेन तपसापि वा निवृत्या
तीर्थगमनात् श्रुतिस्मृतिजपेन वा ३७ त्यागवांश्च पुनः पापं नालं कर्तुमिति श्रुतिः त्यागवान् जन्मम
रणौ नाप्नोतीति श्रुतिर्यदा ३८ प्राप्तवर्त्मा कृतमतिर्ब्रह्म संपद्यते तदा स धनंजय निर्द्वंद्वो मुनिः ज्ञानसम
न्वितः ३९

क्षयोगमार्गः कृतमतिः श्रवणमनननादिनाहं ब्रह्मास्मीति निश्चितबुद्धिः ब्रह्म अखंडानंदं संपद्यते एकेन प्राप्नोति स इति एवं त्यागफलं ज्ञानन्नहंनि
र्द्वंद्वः परिग्रहशून्यः मुनिर्ध्याननिष्ठः ज्ञानेन ब्रह्मात्मैक्यविषयेण समन्वितो भवितुमिच्छुः ३९

राम०
११

शां॰प्र॰मो॰१

समन्वितः सन्वाचवनंगमिष्यामीति कृत्स्नोधर्मः योगेनात्मदर्शनेयदाह याज्ञवल्क्यः इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति। कृत्स्नतमोधर्मस्तत्फलं यानिकं जीवन्मुक्तिसुखं ४० परिग्रहवतागृहस्थेनप्राप्तुंशक्योऽतएतेनयाज्ञवल्क्यादिवत्तस्यापि विदुषः संन्यासेऽधिकारोदर्शितः ४१ परिग्रहसत्त्वेदोषमाह परिग्रहसंगत्यापकरोति तत्श्वजन्मादिहेतोर्मोहस्यपुनःप्राप्तिरित्यर्थः अत्रश्रुतिः तत्त्वेनमयं

वनमामंत्र्यवःसर्वान्गमिष्यामिपरंतप नहिकृत्स्नतमोधर्मःशक्यःप्राप्तुमितिश्रुतिः ४० परिग्रहवतातन्मेप्रत्यक्षमरिसूदन नयाप्तःस्तेनतुपापंहिपरिग्रहमभीप्सता ४१ जन्मक्षयनिमित्तंचशक्यंप्राप्तुमितिश्रुतिः सपरिग्रहमुत्सृज्यकृत्स्नंराज्यंतथैवच ४२ गमिष्यामिविनिर्मुक्तोविशोकोविज्वरस्तथा प्रशाधित्वमिमामुर्वीक्षेमांनिहतकंटकां ४३ नममात्वर्थोस्तिराज्येननभोगैर्वाकुरूत्तम इत्येवमुक्त्वावचनंधर्मराजायुधिष्ठिरः व्युपारमततःपार्थःकनीयान्प्रत्यभाषत ४४ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेयुधिष्ठिरपरिदेवनंसप्तमोध्यायः वैशंपायनउवाच अथार्ज्जुनउवाचेदमधिक्षिप्तइवाक्षमी अभिनीततरंवाक्यंदृढवादपरिग्रहः १ ॥ ॥

विदुषोऽप्यन्वानस्यात्तदेवब्रह्मभयहेतुर्विदुषोपिअमन्वानस्यध्यानमूलत्वमेतिश्रुत्यर्थः फलितमाहइति ४२ गमिष्यामिविनिर्विक्षेपराध्यानसिध्यर्थं क्वचिदित्येकांतदेशत्वंदर्शितं ४३ सप्तमः अथार्ज्जुनः दृढोयुक्तिशक्त्युपेतोवादपराक्रमोयस्यसतथा १ ॥ ॥ ॥ ॥ ॥

ग॰ २ अमानुषमितिच्छेदः दुःखं स्वजनवधात् कष्टं परवीरवधेऽपाप वैक्लव्यं मोघं धर्मलब्धस्याप्यस्मादित्याह ३ शत्रूनिति शत्रून् शातयितृन् परान् हत्वा अघ
९२ विनाश्य शत्रून् शातयितव्यान् स्वीयान् हत्वा घातयित्वा तिवद्वयोरेकेन वाक्येन संग्रहः एतदेव स्पष्टयति ४ कीवस्य स्वीयवधे कातरस्य दीर्घसूत्रस्य
परवधेऽलसस्य एवं चेत् महीपालान् उभयपक्षीयान् किमर्थमवधीः अतो विक्लवोऽसीत्यर्थः ५ योहीतिमार्ध्यश्लोकोवाक्यं हि प्रसिद्धं यः पुमान् ह

दर्शयन् स तदात्मानमुग्रमुग्रपराक्रमः स्मयमानो महातेजाः सृक्किणी परिसंलिहन् १ अर्ज्जुन
उवाच अहो दुःखमहो कष्टमहो वैक्लव्यमुत्तमं यत्कृत्वामानुषं कर्म त्यक्ष्यसे श्रियमुत्तमां ३
शत्रून् हत्वा महीं लब्ध्वा स्वधर्मेणोपपादितां एवंविधं कथं सर्वं त्यजेथा बुद्धिलाघवात् ४ क्ली
बस्य हि कुतो राज्यं दीर्घसूत्रस्य वा पुनः किमर्थं च महीपालानवधीः क्रोधमूर्छितः ५ यो ह्याजिजी
विषुर्भैक्ष्यं कर्म्मणा येन केनचित् समारंभान् बुभूषेत हतस्वस्तिरकिंचनः सर्वलोकेषु विख्यातो
न पुत्रपशुसंहितः ६ कापालीं नृप पापिष्ठां वृत्तिमास्थाय जीवतः संत्यज्य राज्यमृद्धं ते लोकोऽयं किं
वदिष्यति ७ ॥

तस्वस्तिः नष्टकल्याणः अकिंचनो दरिद्रः अतएव क्रमात् सर्वलोकेषु न विख्यातः पुत्रपशुसंहितः पुत्रादिभिराश्लिष्टश्च न भवति स भैक्ष्यं आजिजी
विषुः उपजीवितुमिच्छेत् स कर्मणा पौरुषेण कस्यचिदपि परस्य समारंभं तद्धितिसमारंभात्रर्थीस्थाने नैव बुभूषेत नैव प्राप्तुमिच्छेत् त्वं तु प्राप्तक गम॰
ल्याणः संपन्नः ख्यातः पुत्राद्याश्लिष्टश्च पौरुषेण पीड्यमानमेक्षेण जीवितमिच्छसीति विपर्यस्तबुद्धिरसीति भावः ६ कापालीं भिक्षापात्रव ९२
तामिमां वृत्तिं जीविकां राज्यं संत्यज्य जीवतस्ते इति संबंधः ७

सर्वारंभान् सर्वार्थान् धर्मादीन् प्राकृतवत् मूढवत् ९ धर्महानिं व्युत्पादयति पदीति अस्माकं राज्ञेऽनधिकारात् अधिकारिणस्तवैव धर्मलोपजं किल्विषं भवतीत्यर्थः १० अर्थस्य धर्मादीनां चतुर्णामपि मूलमिति सर्वेषामनन्यतामाह आकिंचन्यमित्यादिना आकिंचन्यं मुनीनां च राज्यादप्यधिकं मतमिति पृत्ववान्तं दुह्शिप नहुषो राजा अधनतामिह धिगस्त्विति अब्रवीत् अधनेन धनाभावनिमित्ते सति अगम्यगमनापात्रदानादि नृशंसं निर्दयं भीमसेना

सर्वारंभान्परित्यज्य हतस्वस्तिरकिंचनः कस्मादाशंससे भैक्ष्यं कर्तुं प्राकृतवत्प्रभो ८ अस्मिन्राजकुले जातो जित्वा कृत्स्नां वसुंधरां धर्मार्थावखिलौ हित्वा वनं मौढ्यात्प्रतिष्ठसे ९ यदिमानि हवींषीह विमथिष्यन्त्यसाधवः भवता विप्रहीणानि प्राप्तं त्वामेव किल्विषं १० आकिंचन्यमनाशस्यमिति वै नहुषोऽब्रवीत् कृत्वा नृशंसं ह्यधने धिगस्त्वधनतामिह ११ अश्वस्तनमृषीणां हि विद्यते वेद तद्भवान् यं त्विमं धर्ममित्याहुर्धनादेष प्रवर्त्तते १२ धर्मं संहरते तस्य धनं हरति यस्य सः ह्रियमाणे धने राजन्वयं कस्य क्षमेमहि १३ अभिशस्तं प्रपश्यन्ति दरिद्रं पार्श्वतः स्थितं दारिद्र्यं पातकं लोके कस्तच्छंसितुमर्हति १४

दिमनुष्यग्रासरूपं कर्म कृत्वा दारिद्र्यं पापहेतुत्वान्निंदितवानित्यर्थः ११ एतदपि ऋषीणामेवोचितं न राज्ञामित्याह अश्वस्तनमिति वृषभेवास्यलोकस्यावि नाशकारणं स्मृताइति यदुक्तं तत्राहेत्विममित्यादि १२ वयं क्षत्रियाः कस्यचित् भ्रातुः पितुर्वाऽपराधं क्षमेमहि न कस्यापीत्यर्थः १३ क्षमायां दोषमाह अभिशस्तवदिति शंसितुं प्रशंसितुं १४

रा० १३

१६ प्रारोति मुमुक्षूणांप्राणायाश्चात्यपर्याधीनेतिमोक्षोप्यर्थादेवभवतीत्याशयः २३ कृशाश्वः क्षीणाश्वः २४ यन्नूक्तंज्ञातीनांपरस्परसुहृद्धतानां

पतितःशोचतेराजन्निर्धनश्चापिशोचते विशेषंनाधिगच्छामिनिर्धनस्यवरस्यच १५ अर्थेभ्योहिविवृद्धेभ्यः संभृतेभ्यस्त
तस्ततः क्रियाःसर्वाःप्रवर्त्तंतेपर्वतेभ्यइवापगाः १६ अर्थाद्धर्मश्चकामश्चस्वर्गश्चैवनराधिप प्राणयात्रापिलोके
स्यविनार्थेनप्रसिध्यति १७ अर्थेनेहविहीनस्यपुरुषस्याल्पमेधसः विछिद्यंतेक्रियाःसर्वाःग्रीष्मेकुसरितोयथा
१८ यस्यार्थास्तस्यमित्राणियस्यार्थास्तस्यबांधवाः यस्यार्थाःसपुमान्लोकेयस्यार्थाःसचपंडितः १९ अधने
नार्थकामेननार्थःशक्योविधित्सता अर्थैरर्थानिबध्यंतेगजैरिवमहागजाः २० धर्मःकामश्चहर्षश्चक्षतिःक्रोधःश्रु
तंमदः अर्थादेतानिसर्वाणिप्रवर्त्तंतेनराधिप २१ धनात्कुलंप्रभवतिधनाधर्मःप्रवर्द्धते, नाधनस्यास्त्ययंलोकोन
परःपुरुषोत्तम २२ नाधनोधर्मकृत्यानियथावदनुतिष्ठति धनाद्धर्मःप्रभवतिशैलादिवनदीयथा २३ यःकृशा
श्वःकृशगवःकृशभृत्यःकृशातिथिः सवैराजन्कृशोनामनशरीरकृशःकृशः २४ अवेक्षस्वयथान्यायंपश्य
देवासुरंयथा राजन्किमन्यज्ज्ञातीनांवधादृध्यंतिदेवताः २५ नचेद्धर्त्तव्यमन्यस्यकथंतद्धर्ममारभेतराजावानेव
वेदेषुनिश्चयःकविभिःकृतः २६॥

हरणांचश्रेयोनास्तीतितच्छिद्राचारप्रदर्शनेनदूषयति अवेक्षस्वेत्यादिना २५ अन्यस्यपरस्यधनंचेन्नहर्त्तव्यंतर्हिराजाकथंधर्ममाचरेत्ततस्यवृत्तंतरा
भावान्नकथंचिदित्यर्थः २६ रा० १३

आहार्यंस्वधर्मेणराज्ञेनीयंतस्यचप्रयोजनंयष्टव्यंइत्युक्तं २६ ननुपरद्रव्यापहारेदोषोस्तीत्याशंक्याहकृत्स्नमिति यदेवधनंराजानः परस्मादाददतेतदेव
तेषांश्रेयः श्रेयस्करं अन्यथाऽनपकृतं अपकारवर्जितंधनंराज्ञांनास्त्येवेत्यर्थः यज्ञार्थंपशुबीजादिवधादिवत्परद्रव्यापहारादपिराज्ञांनदोषोस्तीतिभावः

अध्येतव्यात्रयीनित्यंभवितव्यंविपश्चिता सर्वथाधनमाहार्यंयष्टव्यंचापियत्नतः २७ द्रोहाद्देवैरवाप्तानिदि
विस्थानानिसर्वशः द्रोहात्किमन्यत्ज्ञातीनांगृध्यंतेयेनदेवताः २८ इतिदेवाव्यवसितावेदवादाश्चशाश्वताः
अधीयंतेध्यापयंतेयजंतेयाजयंतिच २९ कृत्स्नंतदेवतच्छ्रेयोयदप्याददतेन्यतः नपश्यामोनपकृतंधनंकिं
चित्क्वचिद्वयं ३० एवमेवहिराजानोजयंतिपृथिवीमिमां जित्वाममेयंब्रुवतेपुत्राइवपितुर्द्धनं ३१ राजर्ष
योपितेस्वर्ग्याधर्मोह्येषांनिरुच्यते यथैवपूर्णादुदधेः स्यंदंत्यापोदिशोदश ३२ एवंराजकुलाद्वित्तंपृथि
वींप्रतितिष्ठति आसीदियंदिलीपस्यनृगस्यनहुषस्यच ३३ अंबरीषस्यमांधातुःपृथिवीसात्वयिस्थि
ता सत्वांद्रव्यमयोयज्ञःसंप्राप्तःसर्वदक्षिणः ३४ तेचेन्नयजसेराजन्प्राप्नस्त्वंराजकिल्बिषं येषांराजा

३१ निरुच्यतेउत्कृष्टत्वेनकीर्त्यते स्यंदंतिप्रस्रवंति ३४ किंच अश्वमेधेनयजतेदक्षिणावता उपेत्यतस्मादवभृथंप्लुताःसर्वेभवंतिते ३५
परवित्तापहारोऽस्यपरोद्धरणार्थएवेत्याहयेषामितियेषांमांडलिकानांप्रजादीनांचद्रव्यापहर्ताराजायजतेतेसर्वेतदवभृथेप्लुताभवंतीत्यर्थः ३५

शां० विश्वरूपइति ब्रह्मणो ब्राह्मणमालभतइत्यादिशास्त्रात्तद्ब्राह्मणादीनां भूतानां स्वदेहस्य च होमः यज्ञार्थं क्रियते तत्र किं ग्राम्यद्रव्यापहारइतिभावः २६ एव
१४ मन्वादिरनंतश्चायं पन्थाः पंथाइत्याह शाश्वतइति दाशरथ्यः एकः पशुः द्वौ पत्नीयजमानौ त्रयो वेदाः चत्वार ऋत्विज इति दशरथाश्चरंति यस्मिन्स दशरथः स
एव दाशरथः २७ अष्टमे मुहूर्तं त्वमपि मद्युक्तेनिवृत्तिमार्गमपि श्रुत्वा मुहूर्तं अंतरात्मनि हृदयपुंडरीके मनः श्रोत्रे बाह्याभ्यंतः करणे धारयन्स्थिरीकुर्वन्ता

विश्वरूपो महादेवः सर्वमेधे महामखे जुहाव सर्वभूतानि तथैवात्मानमात्मना २६ शाश्वतोयं भूमिपथो ना
स्यांतमनुशुश्रुम महानदाशरथः पंथा मा राजन्कुपथं गमः २७ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे त्र्य
र्जुनवाक्ये अष्टमोध्यायः युधिष्ठिर उवाच मुहूर्तं तावदेकाग्रो मनः श्रोत्रेंतरात्मनि धारयस्त्वपि तच्छ्रुत्वा
रोचेत वचनं मम १ साधुगम्यमहं मार्गं न जातु त्वत्कृते पुनः गच्छेयं तं गमिष्यामि हित्वा ग्राम्यसुखान्युत २ क्षेम्य
श्चैकाकिना गम्यः पंथाः कोस्तीति पृच्छ मां अथ वा नेच्छसि प्रष्टुमपृच्छन्नपि मे शृणु ३ ॥ ॥ ॥

वदादौ एकाग्रो भवेति शेषः पश्चात् मम वचनं तुभ्यं रोचेत तत् उक्तं चेयमेव तन्न अंतर्मुखस्यैव निवृत्तिमार्गो भिष्टो न बहिर्मुखस्येति भावः श्रोत्रेंतरितिसंधिरार्षः १
साध्विति उत अपि चाहं ग्राम्यसुखं हित्वा साधुगम्यं मार्गं गच्छेयं न पुनस्त्वत्कृते जातु राज्यं गमिष्यामि स्वीकरिष्यामि २ राज्यमेव साधुगम्यो मार्ग इ शां०
तिचेत्तत्राह क्षेम्यइति २ ३ ॥ १४

तत्रतावद्वनस्थधर्माननुष्ठास्यइत्याह हित्वेत्यादिना ७ पेशलान् रम्यान् ११ पतेर्धर्मानुष्ठानंप्रतिजानीतेऽथवेति १४ आत्मारामः योगेनात्मन्येवरममाणः

हित्वाग्राम्यसुखाचारंतप्यमानोमहत्तपः अरण्येफलमूलाशीचरिष्यामिमृगैःसह ४ जुह्वानोग्निंयथा
कालमुभौकालावुपस्पृशन् कृशःपरिमिताहारश्चर्मचीरजटाधरः ५ शीतवातातपसहःक्षुत्पिपासाश्रम
क्षमः तपसाविविधेनैवेनशरीरमुपशोषयन् ६ मनःकरोमिसुखानित्यंशृण्वन्नुच्चावचागिरः मुदितानामर गि३
ण्येषुवसतांमृगपक्षिणां ७ आजिघ्रन्पेशलान्गंधान्फुल्लानांवृक्षवीरुधां नानारूपाणिपश्यन्रम
णीयानिवनौकसः ८ वानप्रस्थजनस्यापिदर्शनंकुलवासिनां नाप्रियाण्याचरिष्यामिकिंपुनर्ग्रामवा
सिनां ९ एकांतशीलीविमृशन्पक्वापक्वेनवर्तयन् पितॄन्देवांश्चवन्येनवाग्भिरद्भिश्चतर्पयन् १० एवमा
रण्यशास्त्राणामुग्रमुग्रतरंविधिं सेवमानःप्रतीक्षिष्येदेहस्यास्यसमापनं ११ अथवैकोहमेकाहमेकैक
स्मिन्वनस्पतौ चरन्भैक्षंमुनिर्मुण्डःक्षपयिष्येकलेवरं १२ पांसुभिःसमभिच्छन्नःशून्यागारप्रतिश्रयः वृक्षमू
लनिकेतोवासन्नामवीप्रियाप्रियः १३ नशोचन्नप्रहृष्यंश्चतुल्यनिंदात्मसंस्तुतिः निराशीर्निर्ममोभूत्वानिर्द्व
न्द्वोनिःपरिग्रहः १४ आत्मारामःप्रसन्नात्माजडांधबधिराकृतिः अकुर्वाणःपरैःकांचित्संविदंजातुकैरपि १५

प्रसन्नात्माशुद्धसत्वः केनचिन्निमित्तेनसंविदंसंवादनंनकुर्वाणःकृत्याभावात् १५ ॥ ॥ ॥ ॥

रा० चतुर्विधान्जंगमस्यजरायुजांडजस्वेदजभेदेन त्रैविध्यात् स्वधर्मस्थाःप्रगाम्यतःइंद्रियपोषकास्त्वप्रजाःप्रतिसमइत्यन्वयः १७ केनचिन्मार्गेण १८
१५ एवंयत्याश्रमधर्मानुक्त्वाऽत्याश्रमधर्ममाह ऋजुरिति कामक्रोधादिभूतःप्रणिहितांतर्मुखःचरस्पतीतिसभयादिधर्मकेलिंगशरीरमरणकालेऽत्रे
वतिष्ठतीतिस्थावरंस्थूलशरीरंतपोर्वजीकः स्थूलसूक्ष्मशरीराभिमानशून्यइत्यर्थः १९ एवंरूपस्यकथंदेहयात्रानिर्वाहइत्याशंक्याह स्वभावइति
स्वभावःदेहादीनांपूर्वसंस्कारःकटवेष्टनवत्प्रारब्धकर्मोपस्थापितदेहनिर्वाहार्थंअग्रेव्रजतिपुरस्कृतोभवति नन्वेवंसुषुप्तावपिपात्रास्यादित्या

जंगमाजंगमान्सर्वानविहिंसंश्चतुर्विधान् प्रजाःसर्वाःस्वधर्मस्थाःसमःप्राणाम्यतःप्रति १६ नचाप्यवहस
न्कंचित्नकुर्वन्भ्रुकुटीःक्वचित् प्रसन्नवदनोनित्यंसर्वेंद्रियसुसंयतः १७ अपृच्छन्कस्यचिन्मार्गंप्रव्रज
न्नैवकेनचित् नदेशंनदिशंकांचिद्गंतुमिच्छन्विशेषतः १८ गमनेनिरपेक्षश्चपश्चादनवलोकयन् ऋ
जुःप्रणिहितोगच्छन्त्रसस्थावरवर्जकः १९ स्वभावस्तुप्रयात्यग्रेप्रभवंत्यशनान्यपि द्वंद्वानिचविरुद्धा
नितानिसर्वाण्यपचिंतयन् २० अल्पंवास्वादुभोज्यंवापूर्वलाभेनजातुचित् अन्येष्वपिचरल्लाभमलाभे
समतश्चरन् २१

शंक्याह प्रभवंत्यशनान्यपीतियथाप्रसुप्तःशिशुःस्तनंपिबतिसंस्कारदार्ढ्यात्एवंदेहद्वयाभिमानहीनोहमपिभोजनादिकंकरिष्यामीत्यर्थः द्वंद्वादि
षुयानिविरुद्धान्युपमानात्यभोज्यादीनितान्यपिचिंतयन् २० पूर्वलाभेनपूर्वस्मिन्गृहेलाभेनहेतुनाजातुचित्अन्येष्वपिगृहेषुलाभमलभ्यमा राम०
नेचरन्नभक्षयन् २१ ॥ १५

भैक्ष्यकालमाह विधूम इति गृहे इति शेषः २२ त्रीन्गृहान् २३ जिजीविषुवत् धनादिसंग्रहं मुमूर्षुवत् अन्नादित्यागं २४ वासीतक्षायुधं तया २५ या
इति निमिषोन्मेषाशनपानादिशरीरनिर्वाहमात्रकर्मणि अवस्थित इत्यर्थः २६ तेष्वपि कर्मसु असक्तिः अपरित्यक्तः नित्यं वशीकृतः संकल्पो मनः क्रिया येन दृढमना इत्यर्थः नास्ति परित्यक्तः संकल्पो यस्मादन्य इति वा सुनिर्णिक्तात्मकल्मषः सम्यक्दूरीकृतधीमलः २७ वागुराः स्नेहपाशान् २८ वि

विधूमे न्यस्तमुशले व्यंगारे भुक्तवज्जने अतीतपात्रसंचारे काले विगतभिक्षुके २२ एककालं चरन्भैक्षं त्रीनथ
द्वे च पंच वा स्पृहापाशं विमुच्याहं चरिष्यामि महीमिमां २३ अलाभे सति वा लाभे समदर्शी महातपाः न जिजीविषु
वत्किंचिन्न मुमूर्षुवदाचरन् २४ जीवितं मरणं चैव नाभिनंदन्न च द्विषन् वास्यैकं तक्षतो बाहुं चंदनेनैकमुक्षतः ना
कल्याणं न कल्याणं चिंतयन्नुभयोस्तयोः २५ याः काश्चिज्जीविताशक्ताः कर्त्तुमभ्युदयक्रियाः सर्वास्ताः स
मभित्यज्य निमेषादिष्ववस्थितः २६ तेषु नित्यमशक्तश्च त्यक्तसर्वेद्रियक्रियः अपरित्यक्तसंकल्पः सुनिर्मुक्ता
त्मकल्मषः २७ विमुक्तः सर्वसंगेभ्यो व्यतीतः सर्ववागुराः न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः २८ वीतरा
गश्चरन्नेवं तुष्टिं प्राप्स्यामि शाश्वतीं तृष्णया हि महत्पापमज्ञानादस्मि कारितः २९ कुशलाकुशलान्येके कृत्वा
कर्माणि मानवाः कार्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति ३०

कीर्त्तितमाह वीतराग इति २९ एके मूढाः कार्यकारणसंश्लि ॥
ष्टं स्वसुखे न निमित्तभूतं तनं संलग्नं स्त्र्यादिकं बिभ्रति आत्मोपकारकत्वेन पुष्णंति तथा च श्रुतिः न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामा
यपतिः प्रियो भवतीति ३० ॥ ॥

शां०
९६

अनात्मीये घात्मीयत्वबुद्ध्यात्मनः पोषणात् पंकृतं कर्म तन्मरणांते पि न मुंचतीत्याह आयुष इति ३१ व्याविद्धं भ्राम्यमाणं समेति संयोगमेति ३२ अस्वस्थे आत्मनि
अध्यासं विना रक्षां भुजंगवद्विषमाने ३३ ऐहिकाप्यनोत्यागेन सुखमुक्त्वा ऽमुष्मिकाणामपि त्यागेन तदस्तीत्याह दिवइति भवेन स्वर्गैश्वर्येणाकारणामविघात
स्यास्मत्वं दुःखमयत्वं तद्वित् ३४ कृत्वाहीति विविधं सामाद्युपायवत् विविधलक्षणं नानाविधं कपटादिरूपं कर्म कृत्वा स्वल्पैः पार्थिवैः क्षुद्रराजभिर्नृपतिर्महा

आयुषोंते प्रहायेदं क्षीणप्रायं कलेवरं प्रतिगृह्णाति तत्पापं कर्त्तुः कर्म्मफलं हि तत् ३१ एवं संसारचक्रे स्मिन्
व्याविद्धे रथचक्रवत् समेति भूतग्रामो यं भूतग्रामेण कार्यवान् ३२ जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं अपा
रमिव चास्वस्थं संसारं त्यजतः सुखं ३३ दिवः पतत्सु देवेषु स्थानेभ्यश्च महर्षिषु को हि नाम भवेनार्थी भवेत्कार
णतत्ववित् ३४ कृत्वा हि विविधं कर्म्म तत्तद्विविधलक्षणं पार्थिवैर्नृपतिः स्वल्पैः कारणैरेव बध्यते ३५ तस्मा
त्प्रज्ञामृतमिदं चिरान्मां प्रत्युपस्थितं तत्प्राप्य प्रार्थये स्थानमव्ययं शाश्वतं ध्रुवं ३६ एतया सततं धृत्या चरन्ने
वंप्रकारया जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ३७ इति श्रीम
९८ हाभारते शांतिपर्वणि राजधर्म्मेषु युधिष्ठिरवाक्ये नवमोध्यायः ॥

राजा बध्यते कारणैः स्वापमानादिभिर्हेतुभिः बहवो मिलित्वा एकं महांतं घ्नंतीत्यर्थः ३५ यस्माद्दुःखमयं क्षयिष्णु चैश्वर्यं तस्मात्स्थानं मोक्षं अव्ययं
अपक्षयशून्यं शाश्वतं अनादि ध्रुवं सदैकरूपं ३६ संस्थापयिष्यामि समापयिष्यामि ३७ नवमोध्यायः ९ ॥ ॥ ॥ ॥ ॥ शां० ९६

श्रोत्रियस्य वेदपाठकस्य मंदत्वात् देवाविपश्चितः अर्थज्ञानशून्यस्य अनुवाकेन नित्यपाठेन हता नष्टा १ आलस्य एव वतु परमार्थ्ये कृतचित्तस्य तव २ त्वदं
रेत्वत्तोन्यत्र ५ प्राणस्य प्राणावतो बलिष्ठस्य इदं सर्वं अन्नमिवान्नभोग्यं वीरभोग्या वसुंधरेति स्मृतेः अत एव तस्यैव भोजनं भुज्यते पाल्यत इति युक्तत्वापा

भीमसेन उवाच श्रोत्रियस्येव ते राजन् मंदकस्याविपश्चितः अनुवाकहता बुद्धिर्नैषा तत्वार्थदर्शिनी १ आ
लस्ये कृतचित्तस्य राजधर्म्मान् असूयतः विनाशे धार्त्तराष्ट्राणां किं फलं भरतर्षभ २ क्षमानुकंपा कारुण्य
मानृशंस्यं न विद्यते क्षात्रमाचरतो मार्गमपि बंधोस्त्वदंतरे ३ यदीमां भवतो बुद्धिं विद्याम वयमीदृशीं शस्त्रं
नैव ग्रहीष्यामो न वधिष्याम किंचन ४ भैक्ष्यमेवाचरिष्याम शरीरस्याविमोक्षणात् न चेदं दारुणं युद्ध
मभविष्यन्महीक्षितां ५ प्राणस्यान्नमिदं सर्वमिति वै कवयो विदुः स्थावरं जंगमं चैव सर्वं प्राणस्य भोज
नं ६ आददानस्य चेद्राज्यं ये केचित्परिपंथिनः हंतव्यास्त इति प्राज्ञाः क्षत्रधर्मविदो विदुः ७ ते सदोषा
हतास्माभी राज्यस्य परिपंथिनः तान् हत्वा भुंक्ष्व धर्मेण युधिष्ठिर महीमिमां ८ यथा हि पुरुषः खात्वा कूप
मप्राप्य वोदकं पंकदिग्धो निवर्त्तेत कर्मेदं नस्तथोपमं ९
लनीयमिदं यद्यप्येतत्प्राणोपासनाप्रकरणे श्रुतं तथापि सर्वस्याः
त्मार्थत्वमित्यंशेन साम्याद् उदाहृतं ७ हतास्माभिरिति मे धिराणि षः तान् धर्मेण हत्वा निघ्नन् त्वं राज्यं भुंक्ष्व हंतेरभ्यासेपि दृश्यत इति कनि अनुनासिकलोपः हस्व
स्येति तुक् ८ तेन प्रकारेण उपमीयत इति तथोपमं ९ ॥

रवा रं

रा० १७

पतनगच्छत १४ अशक्ताः अशक्तिहीनाः १५ अगतीकगतीनतापरक्षकान् दैर्घ्यमार्ष ईदृशानपित्तस्थापनिदृष्ट्वाऽजनाइतरेपि अपसिद्ध्यैक
थंनानुपश्येयुरपितुआलोचयेयुरेव एतततयादृशंममवचनंतादृशंपश्यतयुक्तमयुक्तंवेतिपरीक्षेतेत्यर्थः समर्थैः स्वार्थसिद्ध्यर्थपतितव्यमेवेतिभावः
१६ ननुसंन्यासएवन श्रेयानित्युक्तंतत्राहआपदिति व्यसितेनदुर्गतिंप्रापितेन १७ इहक्षत्रयोनौत्यागंचरन्मोक्षंमुनिर्भुड्इत्युक्तविध्वंसन्या

कुर्मंदल

तथारुग्णमहावृक्षमपहस्ततोमधु अप्राश्यनिधनंगच्छेत्कर्मेदंनस्तथोपमं १० यथामहांतमध्वानमाशयापु
रुषोव्रजन् सनिराशोनिवर्त्तेतन्नस्तथोपमं ११ यथाशत्रून्घातयित्वापुरुषःकुरुनंदन आत्मानंघातयेत्पश्चात्क
र्मेदंनस्तथाविधं १२ यथान्नंक्षुधितोलब्ध्वानभुंजीयाद्यदृच्छया कामीचकामिनींलब्ध्वाकर्मेदंनस्तथोपमं
१३ वयमेवात्रगर्ह्याहियद्वयंमंदचेतसः त्वांराजन्ननुगच्छामोज्येष्ठोयमितिभारत १४ वयंहिबाहुबलिनःकृत
विद्यामनस्विनः क्लीबस्यवाक्येतिष्ठामोयथैवाशक्तयस्तथा १५ अगतीकगतीनस्मान्नष्टार्थानर्थसिद्धये
कथंवैनानुपश्येयुर्जनाःपश्यतयादृशं १६ आपत्कालेहिसंन्यासःकर्तव्यइतिशिष्यते जरयाभिपरीतेनशत्रुभि
र्व्यसितेनवा १७ तस्मादिहकृतप्रज्ञास्त्यागंनपरिचक्षते धर्मव्यतिक्रमंचैवमन्यंतेसूक्ष्मदर्शिनः १८ ॥ ॥

संनपरिचक्षतेनप्रशंसंति तत्रहेतुःधर्मेति मुखजानामयंधर्मोविस्मवंलिंगधारणं बाहुजानोरुजातानांनायंधर्मोविधीयतइतिस्मृतेःक्षत्रियस्य
मौंड्यादिकंनिषिद्धंतस्याचरणेधर्मव्यतिक्रमोस्त्येवेतिभावः १८ ॥ ॥ रा० १७.